प्राप्तकाले पृथक्त्वेन पश्यन्तीह न चक्षुषा ॥ ९९ ॥
पश्यन्त्येवंविधं सिद्धा जीवं दिव्येन चक्षुषा ।
च्याविति श्वासपानश्च[१] योनीः प्रविशतस्तथा ॥१००॥
तिर्य्यगूर्द्धमधस्ताच्च धावतोऽपि यथाक्रमं ।
जीवप्राणास्तथा लिङ्गं कारणञ्च चतुष्टयं ॥१०१॥
पर्य्यायवाचकैः शब्दैरेकार्थैः सोऽभिलिख्यते ।
व्यक्ताव्यक्ते प्रमाणोऽयं स वै रूपं तु तत्क्रमः ॥१०२॥
अव्यक्तान्तमहीतं च क्षेत्रज्ञाधिष्ठितश्च यत् ।
एवं ज्ञात्वा शुचिर्भूत्वा ज्ञानादेव विमुच्यते ॥१०३॥
नष्टश्चेव यथा तत्त्वं तत्त्वानां तत्त्वदर्शनं ।
यथेष्टं परिनिर्य्याति भिन्ने देहे सुनिर्वृते ॥१०४॥
भिद्यते करणञ्चापि अव्यक्ताज्ञानिनस्ततः ।
मुक्तो गुणशरीरेण प्राणाद्येन तु सर्वशः ॥१०५॥
नान्यच्छरीरमादत्ते दग्धे बीजे यथाङ्कुरः ।
जीविकः[२] सर्वसंसाराद्बीजशारीरमानसः[३] ॥१०६॥
ज्ञानाच्चतुर्दशाच्छुद्धः प्रकृतिं सोऽनुवर्त्तते ।
प्रकृतिं सत्यमित्याहुर्विकारोऽनृतमुच्यते ॥१०७॥
तत्सद्भावोऽनृतं ज्ञेयं सद्भावः सत्यमुच्यते ।
अनामरूपत्वेचज्ञनामरूपं प्रचक्षते ॥१०८॥

---

(१) आविशं श्वासयानश्च इति ङ० श्वाविशं श्वासयानश्च इति च० श्वाविति श्वान्तयानश्च इति क० ।
(२) जालीक इति ख० घ० क० ।
(३) विशं शरीरमानस इति ङ०च० क० ।

यस्माच्च क्षेत्रं विजानाति तस्मात् क्षेत्रज्ञः उच्यते ।
क्षेत्रप्रत्ययतो[1] यस्मात् क्षेत्रज्ञः शुभ उच्यते ॥ १०९ ॥
क्षेत्रज्ञः[2] स्मर्य्यते तस्मात् क्षेत्रन्तज्ज्ञैर्विभाव्यते ।
क्षेत्रत्वप्रत्ययं दृष्टं क्षेत्रज्ञः प्रत्ययी सदा ॥ ११० ॥
क्षयणात् करणाच्चैव क्षतत्राणात्तथैव च ।
भोज्यत्वाद्विषयत्वाच्च क्षेत्रं क्षेत्रविदो विदुः ॥ १११ ॥
महदाद्यं विशेषान्तं सवैरूप्यं विलक्षणं ।
विकारलक्षणं तद्धि मात्रक्षरमेव[3] च ॥ ११२ ॥
तमेव च विकारस्तु यस्माद्धि क्षरते[4] पुनः ।
तस्माच्च कारणाच्चैव क्षरमित्यभिधीयते ॥ ११३ ॥
सुखदुःखमोहभावा भोज्यमित्यभिधीयते ।
अचेतत्वाद्धि विषयस्तद्धि धर्म्मविभुः स्मृतः ॥ ११४ ॥
न क्षीयते न क्षरति विकारप्रसृतस्तु तत् ।
अक्षरस्तेन चाप्युक्तमक्षीणत्वात्तथैव च ॥ ११५ ॥
यस्मात्पूर्य्यनुशेते च तस्मात् पुरुष उच्यते ।
पुरप्रत्ययिको[5] यस्मात् पुरुषेत्यभिधीयते ॥ ११६ ॥
पुरुषं कथयस्वाथ कथन्तज्ज्ञैर्विभाव्यते ।
शुद्धो निरञ्जनाभासो ज्ञानाज्ञानविवर्जितः ॥ ११७ ॥

---

(१) क्षेत्रज्ञः प्रयतो इति ङ० च० ।
(२) क्षेत्रज्ञैरिति पाठः साधुः ।
(३) त्वक्षरक्षरमिति पाठः समीचीनः ।
(४) रक्ष्यते इति च० ङ० ।
(५) पौरप्रत्ययिक इति पाठो विशुद्धः ।

अस्ति नास्तीति सोऽन्योवा बद्धो मुक्तो गतः स्थितः ।
नैर्हेतिकान्तनिर्द्देश्यस्तत्र[१] स्वल्पिश्च विद्यते ॥ ११८ ॥
ग्राह्यत्वाच्च तु देश्यो वै चक्षुत्वात्समदर्शनः ।
आत्मप्रत्ययकारी स्यात्रूनश्चापि चेतुकं[२] ।
भावग्राह्यमनुमान्यं चिन्तयन्न प्रमुह्यते ॥ ११९ ॥
यदा पश्यति ज्ञातारं ज्ञान्तार्थं दर्शनात्मकं ।
दृश्यादृश्येषु निर्द्देश्यन्तदा तदुद्धरं वरं ॥ १२० ॥
एवं ज्ञात्वा स विज्ञाता ततः शान्तिं नियच्छति ।
कार्य्ये च कारणे चैव बुद्ध्यादौ भौतिके तदा ॥ १२१ ॥
संप्रयुक्तो वियुक्तो वा जीवतो वा मृतस्य च ।
विज्ञाता न च दृश्येत पृथक्त्वेनेह सर्व्वशः ॥ १२२ ॥
स्वेनात्मानं तमात्मानं[३] कारणात्मा नियच्छति ।
प्रकृतौ कारणे चैव स्वात्मन्येवोपतिष्ठति ॥ १२३ ॥
अस्ति नास्तीति सोऽन्यो वो द्वासुचेति वा पुनः ।
एकत्वं वा पृथक्त्वं वा क्षेत्रज्ञपुरुषेति वा ॥ १२४ ॥
आत्मवान् स निरात्मा वा चेतनोऽचेतनोऽपि वा ।
कर्त्ता वा सोऽप्यकर्त्ता वा भोक्ता वा भोज्यमेव वा ॥ १२५ ॥
यज्ज्ञात्वा न निवर्त्तन्ते क्षेत्रज्ञे तु निरञ्जने ।
अशाश्वं तदनाख्यानादग्राह्यत्वादहेतुनि ॥ १२६ ॥

---

(१) नैर्हेतिका तु निर्दिश्य स्तत्र इति क० च० छ० ।
(२) आत्मप्रत्ययकारी स न नूनं चाप्यहेतुकं इति पाठोऽत्र सम्भाव्यते ।
(३) तथात्मानमिति क० छ० ।

अप्रतर्क्यमचिन्त्यत्वादवाप्यत्वाच सर्वशः।
नाभिलिप्यति तत्तत्त्वं सम्प्राप्य मनसा सह॥१२७॥
क्षेत्रज्ञे निर्गुणे शुद्धे शान्ते क्षीणे निरञ्जने।
व्यपेतसुखःदुःखे च निरुद्धे शान्तिमागते॥१२८॥
निरात्मके पुनस्तस्मिन् वाच्यावाच्यो न विद्यते।
एतौ संहारविस्तारौ व्यक्ताव्यक्तौ ततः पुनः॥१२८॥
सृजते ग्रसते चैव ग्रस्तः[१] पर्य्यवतिष्ठते।
क्षेत्रज्ञाधिष्ठितं सर्वं पुनः सर्वं प्रवर्त्तते॥१३०॥
अधिष्ठानप्रवृत्तेन तस्य ते[२] बुद्धिपूर्वकं।
साधर्म्यवैधर्म्यकृतसंयोगो विधितस्तयोः।
अनादिमान् स[३] संयोगो महापुरुषजः स्मृतः॥१३१॥
यावच्च सर्गप्रतिसर्गकाल-
स्तावच्च तिष्ठति सुसन्निरुध्य।
पूर्वं स्थितव्ये तदबुद्धिपूर्वं
प्रवर्त्तते तत्पुरुषार्थमेव॥१३२॥
एषा निसर्गप्रतिसर्गं पूर्वं
प्रधानिकौ चेश्वरकारिता च।
अनाद्यनान्ता ह्यभिमानपूर्वकं
त्रिचासयन्तौ जगदभ्युपैति॥१३३॥

---

(१) ग्रस्तो इति क० ङ० ङ० ज०।
(२) अधिष्ठानप्रवृत्तैतत्तस्य वै इति पाठः शुद्धः।
(३) अनादिर्मांश्चेत् इति क० ङ० ज०।

इत्येष प्राकृतः सर्गस्मृतीयो हेतुलक्षणः ।
उक्तो ह्यस्मिंस्तदात्यन्तं करय(१)स्तात् प्रमुच्यते ॥१२४॥
इत्येष प्रतिसर्गो वस्त्रिविधः कीर्त्तितो मया ।
विस्तरेणानुपूर्व्या च भूयः किं वर्णयाम्यहं ॥१२५॥

इति श्रीमहापुराणे वायुप्रोक्ते अनुषङ्गपादो नाम
चत्वारिंशोऽध्यायः समाप्तः ।

---

(१) करस्य इति ङ० च० छ० करज इति ज० । अत्र कविभिरिति पाठः साधुः ।

अथ एकचत्वारिंशोऽध्यायः।

अनुषङ्गपादः।

ऋषय ऊचुः। सूत सुमहदाख्यानं भवता परिकीर्त्तितं।
प्रजानां मनुभिः सार्द्धं देवानामृषिभिः सह ॥१॥
पितृगन्धर्व्वभूतानां पिशाचोरगरक्षसां।
दैत्यानां दानवानां च यक्षाणामेव पक्षिणां ॥२॥
अत्यद्भुतानि कर्म्माणि विधिमान् धर्म्मनिश्चयः।
विचित्राश्च कथायोगा जन्म चाग्र्यमनुत्तमं ॥३॥
तत्कथ्यमानमस्माकं भवता श्लक्ष्णया गिरा।
मनःकर्णसुखं सौते प्रीणात्यामृतसम्भवं ॥४॥
एवमाराध्य ते सूतं सत्कृत्य(१) च महर्षयः।
पप्रच्छुः सत्रिणः सर्व्वे पुनः सर्गप्रवर्त्तनं ॥५॥
कथं सूत महाप्राज्ञ पुनः सर्गः प्रपत्स्यते।
कल्पेषु सम्प्रलीनेषु गुणसाम्ये तमोमये ॥६॥
विकारेष्वविशिष्टेषु अव्यक्ते चात्मनि स्थिते।
अप्रवृत्ते ब्राह्मणान्(२) महामायोऽज्यगैस्तदा।
कथं प्रपत्स्यते सर्गस्तन्नः प्रब्रूहि पृच्छतां ॥७॥

---

(१) सत्कृताश्चेति क०।
(२) अप्रवृत्तौ प्रधानस्तु इति पाठोऽर्थप्रतिपत्तिकरः।

एवमुक्तस्ततः सूतस्तदासौ लोमहर्षणः ।
व्याख्यातुमुपचक्राम पुनः सर्गप्रवर्त्तनं ॥८॥
अहं वो वर्त्तयिष्यामि यथा सर्गः प्रपद्यते ।
पूर्ववत्स तु विज्ञेयः समासात्तं निबोधत ॥ ९॥
दृष्टं चैवानुमेयञ्च तर्कं वक्ष्यामि युक्तितः ।
तस्माद्वाचो(१) निवर्त्तन्ते अप्राप्य मनसा सह ॥१०॥
अव्यक्तवत् परोक्षत्वाद्ग्रहणं तद्दुरासदं ।
विकारैः प्रतिसंहृष्टे(२) गुणसाम्ये निवर्त्तते ॥११॥
प्रधानं पुरुषाणाञ्च साधर्म्म्येणेव तिष्ठति ।
धर्म्माधर्म्मौ प्रलीयेते अव्यक्तौ प्राणिनां सदा ॥१२॥
सत्त्वमात्रात्मको धर्म्मो गुणसत्त्वे प्रतिष्ठितः ।
तमोमात्रात्मकोऽधर्म्मो गुणे तमसि तिष्ठति ॥१३॥
अविभागवतावेतौ गुणसाम्यस्थितावुभौ ।
सर्वंकार्य्यं(३) बुद्धिपूर्वं प्रधानस्य प्रपद्यते ॥१४॥
अबुद्धिपूर्वं क्षेत्रज्ञ अधिष्ठास्यति तान् गुणान् ।
एवं तानभिमानेन प्रपद्येत पुरस्तदा(४) ॥१५॥
यदा प्रवर्त्तितस्त्वन्तु क्षेत्रक्षेत्रज्ञयोर्द्वयोः ।
भोज्यभोक्तृत्वसम्बन्धं प्रपद्येते युतावुभौ ॥१६॥

---

(१) यस्माद्वाचो इति पाठः सुसङ्गतः ।
(२) विकारैः प्रतिसंहृष्टो इति पाठो विशुद्धः ।
(३) सर्व्वंकार्य्यमिति पाठः साधुः ।
(४) पुरःसरमिति ड० च० ।

तस्माच्चरणमव्यक्तं साम्ये स्थित्वा गुणात्मकान्[१] ।
क्षेत्रज्ञाधिष्ठितं तच्च वैषम्यं भजते तु तत् ॥१७॥
ततः प्रपत्स्यते व्यक्तं क्षेत्रक्षेत्रज्ञयोर्द्वयोः ।
क्षेत्रज्ञाधिष्ठितं सत्त्वं विकारं जनयिष्यति ॥१८॥
महदाद्यं विशेषान्तं चतुर्विंशगुणात्मकं ।
क्षेत्रज्ञस्य प्रधानस्य पुरुषस्य प्रपत्स्यते ॥१९॥
ब्रह्माण्डे प्रथमः सोऽथ भविता चेश्वरः पुनः ।
ततो ज्ञेयस्य कृत्स्नस्य सर्वभूतपतिः शिवः ॥२०॥
ईश्वरः सर्व्वमुक्तानां ब्रह्मा ब्रह्ममयो महान् ।
आदिदेवः प्रधानस्यानुग्रहाय प्रवक्ष्यते[२] ॥२१॥
अनाद्यौ वरमुत्पादौ[३] उभौ सूक्ष्मौ तु तौ स्मृतौ ।
अनादिसंयोगयुतौ सर्वक्षेत्रज्ञमेव च ॥२२॥
अबुद्धिपूर्वकं युक्तौ सशक्तौ तु वुरौ तदा ।
अप्रत्ययमनाद्यं च स्थितावुदकमस्यगः[४] ॥२३॥
प्रवृत्ते पूर्वतः पूर्वं पुनः सर्गे प्रपत्स्यते ।
अशागुर्णैः प्रवर्त्तन्ते रजःसत्वतमात्मकं ॥२४॥

प्रवृत्तिकाले रजसाभिपन्न-
महत्त्वभूतादिविशेष्यताच ।

---

(१) गुणात्मकमिति पाठः समीचीनः ।
(२) प्रचक्ष्यते इति ड० ।
(३) स्वयमुत्पन्नौ इति पाठः साधीयान् ।
(४) एष श्लोको लिपिकरप्रमादाद्भ्रान्तिपूर्णः ।

विशेषतां चेन्द्रियतास्तु यान्ति
गुणावधाने[१] पतिभिर्मनुष्याः ॥२५॥
सत्याभिध्यायिन[२] स्तस्य ध्यायिनः सन्निमित्तकं ।
रजःसत्त्वतमा व्यक्ता त्रिधर्म्माणः परस्परं ॥२६॥
आद्यन्ते संप्रपद्यन्ते क्षेत्रतज्ज्ञास्तु सर्वशः ।
संसिद्धकार्य्यकरणा उत्पद्यन्तेऽभिमानिनः ॥२७॥
सर्वे सत्वाः प्रपद्यन्ते अव्यक्तात्पूर्वमेव च ।
प्रसूते या च सुवहाः साधिकाश्चाप्यसाधिका ॥२८॥
संसरन्तस्तु ते सर्वे स्थानप्रकरणैः सह ।
कार्य्याणि प्रतिपद्यन्ते उत्पद्यन्ते पुनः पुनः ॥२९॥
गुणमात्रात्मकाश्चैव धर्म्माधर्म्मौ परस्परं ।
आरभन्तीह चान्योन्यं वरेणानुग्रहेण च ॥३०॥
सर्वे तुल्याः प्रसूतार्थं सर्गादौ यान्ति विक्रियां ।
गुणास्तत् प्रतिधावन्ते तस्मात्तत् तस्य रोचते ॥३१॥
गुणास्ते यानि सर्वाणि प्राक् सृष्टेः प्रतिपेदिरे ।
तान्येव प्रतिपद्यन्ते सृज्यमानाः पुनः पुनः ॥३२॥
हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते ।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते ॥३३॥
महाभूतेषु नानात्वमिन्द्रियार्थेषु मूर्त्तिषु ।
विप्रयोगाश्च भूतानां गुणेभ्यः संप्रवर्त्तते ॥३४॥

---

(१) गुणावधानौ इति ङ० च० ।
(२) सत्याभिध्यायिन इति क० ।

इत्येष वो मया ख्यातः पुनः सर्गः समासतः ।
समासादेव वक्ष्यामि ब्रह्मणोऽथ समुद्भवं ॥२५॥
अव्यक्तात्कारणात्तस्मान्नित्यात् सदसदात्मकात् ।
प्रधानपुरुषाभ्यान्तु जायते च महेश्वरः ॥२६॥
स पुनः सम्भवपिता[1] जायते ब्रह्मसंज्ञितः ।
सृजते स पुनर्लोकानभिमानगुणात्मकान् ॥२७॥
अहङ्कारस्तु महतस्तस्माद्भूतानि चात्मनः ।
युगपत् सम्प्रवर्त्तन्ते भूतान्येवेन्द्रियाणि च ।
भूतभेदाश्च भूतेभ्यः इति सर्गः प्रवर्त्तते ॥२८॥
विस्तरावयवस्तेषां यथाप्रज्ञं यथाश्रुतं ।
कीर्त्तितं वो यथा पूर्वं तथैवाभ्युपधार्य्यतां ॥२९॥

एतच्छ्रुत्वा नैमिषेयास्तदानीं
लोकोत्पत्तिं संस्थितिं च व्ययञ्च[2] ।
तस्मिन् सत्रे[3]ऽवभृथं[4] प्राप्य शुद्धाः
पुण्यं लोकमृषयः प्राप्नुवन्ति[5] ॥४०॥
यथा यूयं विधिवद्देवतादी-
निष्ट्वा[6] चैवावभृथं प्राप्य शुद्धाः[7] ।

---

(१) सम्भावयिता इति ङ॰ च॰ ।
(२) चाव्ययञ्च इति ङ॰ च॰, चाव्ययञ्च इति क॰ ।
(३) सेचे इति क॰ ।
(४) प्रभृथमिति ङ॰ च॰, ऽवभृतमिति क॰ ।
(५) प्राप्नुवन्तः इति पाठः समीचीनः ।
(६) विधिदेवतादीनिष्ट्वा इति क॰ ।
(७) पुण्यं लोकमृषयः प्राप्नुवन्ति ॥ ४० ॥ यथा यूयं विधिवद्देवतादीनिष्ट्वा चैवावभृथं प्राप्य शुद्धाः इत्यन्तपाठो ङ॰ च॰ पुस्तकयोर्न विद्यते ।

त्यक्त्वा देहानायुषोऽन्ते कृतार्थान्

पुण्यान् लोकान् प्राप्य यथेष्टं चरिष्यथ(१) ॥४१॥

एते ते नैमिषेया वै दृष्ट्वा स्पृष्ट्वा च वै तदा।

जग्मुश्चावभृथस्नाताः स्वर्गं सर्वे तु सत्रिणः ॥४२॥

विप्रास्तथा यूयमपि दृष्ट्वा बहुविधैर्मखैः।

आयुषोऽन्ते ततः स्वर्गं गन्तारः स्थ द्विजोत्तमाः ॥४३॥

प्रक्रिया प्रथमे पादे कथावस्तुपरिग्रहः।

अनुषङ्ग उपोद्घात उपसंहार एव च ॥४४॥

एवमेतच्चतुष्पादं पुराणं लोकसम्मतं।

उवाच भगवान् साक्षाद्वायुर्लोकहिते रतः ॥४५॥

नैमिषे सत्रमासाद्य मुनिभ्यो मुनिसत्तमाः।

तत्प्रसादादसंदिग्धं भूतोत्पत्तिकथानि च ॥४६॥

प्राधानिकीमिमां सृष्टिं तथैवेश्वरकारितां।

सम्यग् विदित्वा मेधावी न मोहमधिगच्छति ॥४७॥

इदं यो ब्राह्मणो विद्वानितिहासं पुरातनं ॥

शृणुयाच्छ्रावयेद्वापि तथाध्यापयतेऽपि च ॥४८॥

स्थानेषु स महेन्द्रस्य मोदते शाश्वतीः समाः।

ब्रह्मसायोज्यगो भूत्वा ब्रह्मणा सह मोदते ॥४८॥

तेषां कीर्त्तिमतां कीर्त्तिं प्रजेशानां महात्मनां।

---

(१) आदर्शपुस्तकमात्रे, एतच्छ्लोकादिपदद्वये बहुलपाठान्तरदर्शना-च्छन्दोभङ्गदर्शनाच्च एतत्पद्यद्वयमशुद्धमेव मन्यामहे। अनयोश्छन्दः शालिनीति ध्येयं।

प्रथयन् पृथिवीशानां ब्रह्मभूयाय गच्छति ॥५०॥
धन्यं यशस्यमायुष्यं पुण्यं वेदैश्च सम्मितं ।
कृष्णद्वैपायनेनोक्तं पुराणं ब्रह्मवादिना ॥५१॥
मन्वन्तरेश्वराणां च यः कीर्त्तिं प्रथयेदिमां ॥
देवतानामृषीणाञ्च भूरिद्रविणतेजसां ।
स सर्वैर्मुच्यते पापैः पुण्यञ्च महदाप्नुयात् ॥५२॥
यश्चेदं श्रावयेद्विद्वान् सदा पर्वणि पर्वणि ।
धूतपाप्मा जितस्वर्गो ब्रह्मभूयाय कल्पते ॥५३॥
यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान् पादमन्ततः ।
अक्षय्यं सार्वकामीयं पितॄंस्तच्चोपतिष्ठति ॥५४॥
यस्मात्पुरा ह्यनक्तीदं पुराणन्तेन चोच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥५५॥
तथैव त्रिषु वर्णेषु ये मनुष्याः प्रधानतः ।
इतिहासमिदं श्रुत्वा धर्माय विदधे मतिं ॥५६॥
यावन्त्यस्य शरीरेषु रोमकूपाणि सर्वशः ।
तावत्कोटिसहस्राणि वर्षाणां दिवि मोदते ।
ब्रह्मसायोज्यगो भूत्वा दैवतैः सह मोदते ॥५७॥
सर्व्वपापहरं पुन्यं पवित्रञ्च यशस्वि च ।
ब्रह्मा ददौ शास्त्रमिदं पुराणं मातरिश्वने ॥५८॥
तस्माच्चोशनसा प्राप्तं तस्माच्चापि वृहस्पतिः ।
वृहस्पतिस्तु प्रोवाच सवित्रे तदनन्तरं ॥५९॥
सविता मृत्यवे प्राह मृत्युश्चेन्द्राय वै पुनः ।

इन्द्रश्चापि वशिष्ठाय सोऽपि सारस्वताय च ॥६०॥
सारस्वतस्त्रिधाम्ने च त्रिधामा च शरद्वते ।
शरद्वतस्त्रिविष्टाय सोऽन्तरिक्षाय दत्तवान् ॥६१॥
वर्षिणे चान्तरिक्षो वै सोऽपि त्रय्यारुणाय च ।
त्रय्यारुणो धनञ्जये स च प्रादात् कृतञ्जये ॥६२॥
कृतञ्जयात्तृणञ्जयो भरद्वाजाय सोऽप्यथ ।
गौतमाय भरद्वाजः सोऽपि निर्य्यन्तरे पुनः ॥६३॥
निर्य्यन्तरस्तु प्रोवाच तथा वाजश्रवाय(१) च ।
स ददौ सोमशुष्माय स ददौ तृणविन्दवे ॥६४॥
तृणविन्दुस्तु दक्षाय दक्षः प्रोवाच शक्तये ।
शक्तेः पराशरश्चापि गर्भस्थः श्रुतवानिदं ॥६५॥
पराशराज्जातुकर्णस्तस्माद्द्वैपायनः प्रभुः ।
द्वैपायनात् पुनश्चापि मया प्रोक्तं द्विजोत्तमाः ॥६६॥
शांशपायन उवाच । मया वै तत्पुनः प्रोक्तं पुत्रायामितबुद्धये ।
इत्येव वाचा ब्रह्मादिगुरुणा समुदाहृता ॥६७॥
नमस्कार्य्याश्च गुरवः प्रयत्नेन मनीषिभिः ।
धन्यं यशस्यमायुष्यं पुण्यं सर्वार्थसाधकं ॥६८॥
पापघ्नं नियमेनेदं श्रोतव्यं ब्राह्मणैः सदा ।
नाशुचौ नापि पापाय नाप्यसंवत्सरोषिते ॥६९॥
नाश्रद्दधानाविदुषे नापुत्राय कथञ्चन ।
नाहिताय प्रदातव्यं पवित्रमिदमुत्तमं ॥७०॥

(१) वाजस्रवायेति च० ।

अव्यक्तं वै यस्य योनिं वदन्ति
व्यक्तं देहं कालमन्तर्गतञ्च ।
वह्निं वक्त्रं चन्द्रसूर्य्यौ च नेत्रे
दिशः श्रोत्रे घ्राणमाकाश वायुं ॥७१॥
वाचो वेदांश्चान्तरिक्षं शरीरं
क्षितिं पादौ तारका रोमकूपान् ।
सर्वाणि चाङ्गानि तथैव तानि
विद्याश्चाङ्गानि यस्य पुच्छं ॥७२॥
तं देवदेवं जननं जनानां
सर्व्वेषु लोकेषु प्रतिष्ठितञ्च(१) ।
वरं वराणां वरदं महेश्वरं
ब्रह्माणमादिं प्रयतो नमस्ये ॥७३॥

इति श्रीमहापुराणे वायुप्रोक्ते अनुषङ्गपादे सृष्टिवर्णनं नाम
एकचत्वारिंशोऽध्यायः समाप्तः ।

---

(१) यच्चात्मकं सत्यलोकप्रतिष्ठितञ्च इति क० ङ० ।

अथ द्विचत्वारिंशोऽध्यायः।

व्याससंशयापनोदनं।

शौनकादिऋषयः ऊचुः।

सूत सूत महाभाग त्वया भगवता सता।
व्यासप्रसादाधिगतशास्त्रसम्बोधनेन च ॥१॥
अष्टादशपुराणानि चेतिहासानि चानघ।
उपक्रमोपसंहारविधिनोक्तानि कृत्स्नशः ॥२॥
चतुर्दशसहस्रं च मात्स्यं प्रोक्तमतिस्फुटम्।
तत्संख्यकं भविष्यञ्च प्रोक्तं पञ्चशताधिकम् ॥३॥
मार्कण्डेयं महारम्यं प्रोक्तं नवसहस्रकं।
कथितं ब्रह्मवैवर्त्तमष्टादशसहस्रकं ॥४॥
शतोत्तरञ्च ब्रह्माण्डं सूर्य्यसंख्यासहस्रकं।
अथ भागवतं दिव्यं अष्टादशसहस्रकं ॥५॥
सहस्राणि दशैवोक्तं पुराणं ब्रह्मनामकं।
अयुतश्लोकघटितं पुराणं वामनाभिधम् ॥६॥
तथैवायुतसंख्यातं षट्शताधिकमादिकं।
चयोविंशतिसाहस्रमनिलं तद्वतं शुभं ॥७॥
चयोविंशतिसाहस्रं नारदीयमुदाहृतं।
एकोनविंशसाहस्रं वैनतेयमुदाहृतं ॥८॥
सहस्रपञ्चपञ्चाशत् प्रोक्तं पाद्मं सुविस्तरं।
सप्तदशसहस्रन्तु कूर्मं प्रोक्तं मनोहरं ॥९॥

चतुर्विंशतिसाहस्रं शौकरं परमाद्भुतं ।
एकाशीतिसहस्राणि स्कान्दमुक्तं सुविस्तृतं ॥१०॥
एवमष्टादशोक्तानि पुराणानि लृशन्ति च ।
पुराणेष्वेषु बहवो धर्मास्ते विनिरूपिताः ॥११॥
रागिणाञ्च विरागाणां यतीनां ब्रह्मचारिणां ।
गृहस्थानां वनस्थानां स्त्रीशूद्राणां विशेषतः ॥१२॥
ब्राह्मणक्षत्रियविशां ये च सङ्करजातयः ।
गङ्गाद्या या महानद्यो यज्ञव्रततपांसि च ॥१३॥
अनेकविधदानानि यमाश्च नियमैः सह ।
योगधर्मा बहुविधाः सांख्या भागवतास्तथा ॥१४॥
भक्तिमार्गा ज्ञानमार्गा वैराग्यानिलनीरजाः ।
उपासनविधिश्चोक्तः कर्मसंशुद्धिचेतसां ॥१५॥
ब्राह्मं शैवं वैष्णवं च सौरं शाक्तं तथार्हतं ।
षड्दर्शनानि चोक्तानि स्वभावनियतानि च ॥१६॥
एतदन्यच्च विविधं पुराणेषु निरूपितं ।
अतः परं किमप्यस्ति न वा बोद्धव्यमुत्तमं ॥१७॥
न शायेत यदि व्यासो गोपयेदथ वा भवान् ।
अत्र नः संशयं छिन्धि पूर्णः पौराणिको यतः ॥१८॥
सूत उवाच । शृणु शौनक वक्ष्यामि प्रश्नमेनं सुदुर्लभं ।
अतिगोप्यतरं दिव्यमनाख्येयं प्रचक्षते ॥१९॥
पराशरसुतो व्यासः कृत्वा पौराणिकीं कथां ।
सर्ववेदार्थघटितां चिन्तयायास चेतसि ॥२०॥

वर्णाश्रमवतां धर्म्मो मया सम्यगुदाहृतः ।
मुक्तिमार्गा बहुविधा उक्ता वेदाविरोधतः ॥२१॥
जीवेश्वरब्रह्मभेदो निरस्तः सूत्रनिर्णये ।
निरूपितं परं ब्रह्म श्रुतियुक्तविचारतः ॥२२॥
ऋश्चरं परमं ब्रह्म परमात्मा परं पदं ।
यदर्थं ब्रह्मचर्यादिवाणप्रस्थयतिव्रतं ॥२३॥
आचरन्ति महाप्राज्ञा धारणाश्च पृथग्विधाः ।
आसनं प्राणरोधश्च प्रत्याहारश्च धारणा ॥२४॥
ध्यानं समाधिरेतानि यमैश्च नियमैः सह ।
अष्टाङ्गानि यदर्थञ्च चरन्ति मुनिपुङ्गवाः ॥२५॥
यदर्थं कर्म कुर्वन्ति वेदाज्ञामात्रतत्पराः ।
परार्पणधिया सम्यङ्निष्कामाः कलिलोज्झिताः ॥२६॥
यज्ञाप्तये निराकर्त्तुं पापाचरणमात्मनः ।
गङ्गादितीर्थवर्याणि निषेवन्ते शुचिव्रताः ॥२७॥
तद्ब्रह्म परमं शुद्धमनाद्यन्तमनामयं ।
नित्यं सर्वगतं स्थाणु कूटस्थं कूटवर्जितं ॥२८॥
सर्वेन्द्रियचराभासं प्राकृतेन्द्रियवर्जितं ।
दिक्कालाद्यनवच्छिन्नं नित्यचिन्मात्रमव्ययं ॥२९॥
अध्यास्तं सर्ववच्च विश्वमेतत्प्रकाशते ।
विश्वस्मिन्नपि चान्वेति निर्विकारश्च रज्जुवत् ॥३०॥
सम्यग्विचारितं यद्वत्फेनोर्म्मिबुद्बुदोदकं ।
तथा विचारितं ब्रह्म विश्वस्मान्न पृथग्भवेत् ॥३१॥

सर्वं ब्रह्मैव नानात्वं नास्तीति निगमा जगुः।
यस्माद्भवन्ति ब्रह्माण्डकोटयो न भवन्ति[१] च ॥३२॥
यदुन्मेषनिमेषाभ्यां जगतां प्रलयोदयौ।
भवेतां या परा शक्तिर्यदाधारतया स्थिता ॥३३॥
यस्मिन्निदं यतश्चेदं येनेदं यदिदं स्मृतं।
यदज्ञानाज्जगद्भाति यस्मिन् ज्ञाते जगन्न हि ॥३४॥
असत्यं यज्जडं दुःखं अवस्थिति निरूपितं।
विपरीतमतो यद्वै सच्चिदानन्दमूर्त्तिकं ॥३५॥
जीवे जाग्रति विश्वाख्यं स्वप्ने यत्तैजसं स्मृतं।
सुषुप्तौ प्राज्ञसंज्ञं यत्सर्वावस्थासु संस्मृतं[२] ॥३६॥
यच्चक्षुषां चक्षुरथ श्रोत्राणां श्रोत्रमप्यति।
त्वक् त्वचां रसनं तस्य घ्राणं घ्राणस्य यद्विदुः ॥३७॥
बुद्धिर्ज्ञानेन च प्राणाः क्रियाशक्त्या निरन्तरं।
यच्छेशिरे समभ्येतुं ज्ञातुं च परमार्थतः ॥३८॥
रज्जावहिर्मरौ वारि नीलिमा गगने यथा।
असद्विश्वमिदं भाति यस्मिन्नज्ञानकल्पितं ॥३८॥
घटावच्छिन्न एवायं महाकाशो विभिद्यते।
कार्योपाधिपरिच्छिन्नं तद्वज्जीवसंज्ञकं ॥४०॥
मायया चित्रकारिण्या विचित्रगुणशीलया।
ब्रह्माण्डं चित्रमतुलं यस्मिन् भित्ताविवार्पितं ॥४१॥

---

(१) ब्रह्माण्डकोटयः प्रभवन्ति इति पाठः समीचीनः।
(२) तत्स्मृतमिति पाठः साधुः।

धावतोऽन्याननतिक्रान्तं वदतो वागगोचरं।
वेदवेदान्तसिद्धान्तैर्विनिर्णीतं तदक्षरं ॥४२॥
अक्षराच्च परं किञ्चिन्न काष्ठा सा परा गतिः।
इत्येवं श्रूयते वेदे बहुधाऽपि विचारिते ॥४३॥
अक्षरस्यात्मनश्चापि स्वात्मरूपतया स्थितं।
परमानन्दसन्दोहरूपमानन्दविग्रहं ॥४४॥
लीलाविलासरसिकं वल्लवीयूथमध्यगं।
शिखिपिच्छकिरीटेन भास्वद्रत्नचितेन च ॥४५॥
उल्लसद्विद्युदाटोपकुण्डलाभ्यां विराजितं।
कर्णोपान्तचरन्नेत्रखञ्जरीटमनोहरं ॥४६॥
कुञ्जकुञ्जप्रियावृन्दविलासरतिलम्पटम्।
पीताम्बरधरं दिव्यं चन्दनालेपमण्डितं ॥४७॥
अधरामृतसंसिक्तवेणुनादेन वल्लवीः।
मोहयन्तञ्चिदानन्दमनङ्गमदभञ्जनं ॥४८॥
कोटिकामकलापूर्णं कोटिचन्द्रांशुनिर्मलं।
त्रिरेखकण्ठविलसद्रत्नगुञ्जामृगाकुलं ॥४९॥
यमुनापुलिने तुङ्गे तमालवनकानने।
कदम्बचम्पकाशोकपारिजातमनोहरे ॥५०॥
शिखिपारावतशुकपिककोलाहलाकुले।
निरोधार्थं गवामेव धावमानमितस्ततः ॥५१॥
राधाविलासरसिकं कृष्णाख्यं पुरुषं परं।
श्रुतवानस्मि वेदेभ्यो यतस्तद्गोचरोऽभवत् ॥५२॥

एवं ब्रह्मणि चिन्मात्रे निर्गुणे भेदवर्जिते।
गोलोकसंज्ञिके कृष्णो दीव्यतीति श्रुतं मया॥५३॥
नातः परतरं किञ्चिन्निगमागमयोरपि।
तथापि निगमो वक्ति ह्यक्षरात् परतः परः॥५४॥
गोलोकवासी भगवानक्षरात् पर उच्यते।
तस्मादपि परः कोऽसौ गीयते श्रुतिभिः सदा॥५५॥
उद्दिष्टो वेदवचनैर्विशेषो ज्ञायते कथं।
श्रुतेर्वार्थोऽन्यथा बोध्यः परतस्त्वक्षरादिति॥५६॥
श्रुत्यर्थे संशयापन्नो व्यासः सत्यवतीसुतः।
विचारयामास चिरन्न प्रपेदे यथातथं॥५७॥
सूत उवाच। विचारयन्नपि मुनिर्नाप वेदार्थनिश्चयं।
वेदो नारायणः साक्षाद्यत्र मुह्यन्ति सूरयः॥५८॥
तदापि महतीमार्त्तिं मतां हृदयतापिनीं।
पुनर्विचारयामास कं व्रजामि करोमि किं॥५९॥
पृच्छामि [(१)] न जगत्यस्मिन् सर्वज्ञं सर्वदर्शनं।
अज्ञात्वाऽन्यतमं लोके सन्देहविनिवर्त्तकं॥६०॥
मेरोः कुहरिणीं गत्वा चचार परमन्तपः।
यत्र कार्त्तस्वरस्फूर्जज्ज्योत्स्नाजालैर्निरन्तरं॥६१॥
सदा प्रबाधते विश्वकृतमःस्तोमं दृशन्तुदं।
चकास्ति यत्र परमं कान्तारमतिसुन्दरं॥६२॥

---

(१) पश्यामीति पाठः साधीयान्।

नानाद्रुमलताकुञ्जकूजत्पक्षिनिनादितं ।
क्षुत्पिपासाभयक्रोधतापग्लानिविवर्जितं ॥६३॥
जलाशयैर्बहुविधैः पद्मिनीखण्डमण्डितैः ।
जातरूपशिलानद्धतटसञ्चारपक्षिभिः ॥६४॥
सुगन्धमम्भोजपवनैः सेव्यमानं समन्ततः ।
शिशिरध्वामितस्वभावैर्हिंस्रैः सत्त्वैः समुज्झितं ॥६५॥
निर्जनं दिव्यलतिकाप्रियखण्डविराजितं ।
शुकैः पारावतैर्हंसैरुन्मदमत्तकोकिलम् ॥६६॥
उत्पतत्पद्मरजसां पटलामोददिङ्मुखं ।
तत्रापि काञ्चनी दिव्या गुहा परमशोभना ॥६७॥
तां प्रविश्य जिताहारो जितचित्तो जितासनः ।
सस्मार वेदांश्चतुरस्तदेकाग्रमना मुनिः ॥६८॥
त्रयी जगाम सरदां (१) शतस्य (२) स्मरतोऽस्य हि ।
प्रादुरासंस्ततो वेदाश्चत्वारश्चारुदर्शनाः ॥६९॥
स्फुरत्पद्मपलाशाक्षा जटामुकुटधारिणः ।
कुशमुष्टिकराम्भोजा मृगलक्ष्ममण्डितांसकाः ॥७०॥
स्वरैः षोडशभिः क्लृप्तवदनाः प्रणवान्तराः ।
कचवर्गोद्भवैर्वर्णैः पञ्चावयवपाणयः ॥७१॥
पवर्गदक्षचरणा वामपादास्तवर्गतः ।
यान्तरन्त्यन्तवर्णाश्च येषां कुक्षिद्वयात्मकौ(३) ॥७२॥

---

(१) शुभदां इति पाठः समीचीनः ।
(२) तत्र तां इति पाठः साधुः ।
(३) कुक्षिद्वयात्मकाः इति पाठः सङ्गतः ।

नाभिनिद्राः कान्तपृष्ठा मोदराः धरलवोल्कचाः ।
अग्निदर्वांशरुचिरा धराग्रीवा भृतांसकाः ॥७३॥
अन्तास्यमन्धिसंस्थाना वैखरीवाग्विजृम्भिताः ।
अपसव्यमथुरामेषां हृदयोम्भोजकल्पिता ॥७४॥
हरेर्भगवतः साक्षादाविर्भावस्थली हि सा ।
काञ्चीमपसव्यद्भ्रुमध्ये मायामाधारसंस्थितां ॥७५॥
लिङ्गदेशे ततः काञ्चीमवन्तीं नाभिमण्डले ।
कण्ठस्थां द्वारकामेषां प्रयागं प्राणगन्तया ॥७६॥
मध्यापसव्ययोरेषां गङ्गाऽपि यमुना नदी ।
मध्ये सरस्वती साक्षाद्भ्याक्षेचन्नयानने ॥७७॥
हनुग्रीवामध्यगतं प्रभासक्षेत्रमुत्तमं ।
वदर्थ्याश्रममेतेषां ब्रह्मरन्ध्रे ददर्श ह ॥७८॥
पौण्ड्रवर्धननेपालपीठं नयनयोर्युगे ।
पीठम्पूर्णगिरिन्नाम ललाटे समदृश्यत ॥७९॥
कण्ठे च मथुरापीठं काञ्चीपीठं कटिस्थितं ।
जालन्धरं तथा पीठं स्तनदेशेष्वदृश्यत ॥८०॥
भृगुपीठं कर्णदेशे अयोध्यां नासिकापुटे ।
ब्रह्मरन्ध्रे स्थितं ब्राह्म्यं शैवं सीमन्तसीमनि ॥८१॥
शाक्तं जिह्वाग्रधिषणं वैष्णवं हृदयाम्बुजे ।
सौरश्चक्षुःप्रदेशस्थं बौद्धच्छायासमन्वितं ॥८२॥
सौत्रामणिं कण्ठदेशे पशुबन्धमथोरसि ।
वाजपेयं कटितटे अग्निहोत्रं तथानने ॥८३॥

अश्वमेधं कटितटे नरमेधमथोदरे।
राजसूयं शिरोदेशे आवसथ्यं तथाऽधरे॥८४॥
ऊर्द्धोष्ठे दक्षिणाग्निञ्च गार्हपत्यं मुखान्तरे।
हव्यं श्रुतौ मन्त्रभेदांस्तथा रोमस्ववस्थितान्।
भृत्यैरिव महाराजं पुराणैर्न्यायमिश्रितैः॥८५॥
संहिताभिश्च तन्त्रैश्च पृथक्पृथगुपासितान्।
कर्मज्ञानोपासनाभिर्जनानुग्रहकारकान्॥८६॥
दृष्ट्वा सुविस्मितमना मुनिः कृष्णो बभूव तान्।
ब्रह्मतेजोमयान् दिव्यांस्तपतोऽर्कानिव च्युतान्[१]।
ज्वलतोऽग्नीनिवोदर्कान् कोटीन्दुसमदर्शनान्॥८७॥
ववन्दे सहसोत्थाय दण्डवत् पतितो मुनिः।
कृतार्थोऽहं कृतार्थोऽहं कृतार्थोऽहमितीरयन्॥८८॥
अद्य मे सफलं जन्म अद्य मे सफलं मनः[२]।
अद्य मे सफलञ्चायुर्यद्भवन्तोऽक्षिगोचराः॥८९॥
अलौकिकं लौकिकञ्च यत् किञ्चिदपि विद्यते।
न तद्वोऽविदितं वेद्यं भूतं भव्यं भवच्च यत्॥९०॥
न प्रवृत्तिफला यूयं दर्शयन्तोऽपि तान् सदा।
यदृच्छाकरसङ्कोचविधानायेह[३] रागिणां॥९१॥
प्रपञ्चस्यापि मिथ्यात्वे ब्रह्मत्वे वा विधीतरौ।

(१) त्विषा इति पाठः साधुः।
(२) तपः इति पाठः समीचीनः।
(३) यद्दृच्छाकरसङ्कोचविधानायेह इति अथवा यदृच्छाकरसङ्कोच विधानायेह इति पाठोऽर्थप्रतिपत्तिकरः।

न स्पृहारागविषयौ तत्सङ्कोचविधिस्तयौ ॥८२॥
अतो लोकहितैर्नूनं परमार्थनिरूपणे ।
स्वोक्ताः स्वर्गादिविषया नश्वरा इति निन्दिताः ॥८३॥
अधिकारिविभेदेन कर्मज्ञानोपदेशतः ।
त्रातं सर्वं जगन्नूनं शब्दब्रह्मात्ममूर्त्तिभिः ॥८४॥
अतोऽहं प्रष्टुमिच्छामि भवन्तश्चेत् कृपालवः ।
कर्मणां फलमादिष्टं स्वर्गः कामैकचेतसाम् ॥८५॥
ईशार्पितधियां पुंसां कृतस्यापि च कर्मणः ।
चित्तशुद्धिस्ततो ज्ञानं मोक्षश्च तदनन्तरं ॥८६॥
मोक्षो ब्रह्मैक्यमित्येवं सच्चिदानन्दमेव यत् ।
सर्वं समाप्यते तस्मिन् ज्ञाते यद्धि कृताकृतं ॥८७॥
यन्निःसङ्गं चिदाकाशं ज्ञानरूपमसंस्कृतं ।
निरीहमचलं शुद्धमगुणं व्यापकं स्मृतं ॥८८॥
विकारेषु विनश्यत्सु निर्विकारं न नश्यति ।
यथान्धतमसा व्याप्तलोकस्य ररोजसा(१) ॥८९॥
लोहस्येव मणिस्तद्वद्मणियाश्चेतयिता यत्(२) ।
यदाभासेन सा सत्तां प्रतिपद्य विजृम्भते ॥१००॥
जीवेश्वरादिरूपेण विश्वाकारेण चाप्यहो ।
तस्यामपि प्रलीनायां कूटस्थस्य यदेकत्वं(३) ॥१०१॥

---

(१) रविरोजसा इति पाठोऽत्र सम्भाव्यते ।
(२) अयस्कान्ते यथा इति पाठोऽर्थावगतिसाधनः ।
(३) कूटस्थस्यैव केवलं इति पाठः सुलभार्थः ।

भवद्भिरेवं निर्णीतं तत्तथैव न संशयः।
तथापि मम जिज्ञासा वर्त्तते केवलं हृदि ॥१०२॥
अतोऽपि परमं किञ्चिदवर्त्तते किन्न वा न वा।
तद्वदन्तु महाभागा भवन्तस्तत्त्वदर्शनाः ॥१०३॥
यच्छ्रुवःफलमेवेह जनुषो मे कृतार्थता।
एवं ब्रुवन्तमनघं व्यासं सत्यवतीसुतं।
साधु साध्विति सङ्कीर्त्य प्रत्यूचुर्निगमा वचः ॥१०४॥
वेदा ऊचुः। साधु साधु महाप्राज्ञ विष्णुरात्मा शरीरिणां।
अजोऽपि जन्म सम्पद्य लोकानुग्रहमीहसे ॥१०५॥
अन्यथा तेन घटते संसारकर्म्म बन्धनं।
अस्पृष्टो मायया देव्या कदाचिज्ज्ञानगूढया ॥१०६॥
विभर्षि स्वेच्छया रूपं स्वेच्छयैव निगूहसे।
अस्मत्तस्मात एवार्थो भवता सम्प्रदर्शितः ॥१०७॥
पुराणेष्वितिहासेषु स्वचेष्वपि च नैकधा।
अक्षरं ब्रह्म परमं सर्वकारणकारणं ॥१०८॥
तस्यात्मनोऽप्यात्मभावतया पुष्पस्य गन्धवत्।
रसवद्वा स्थितं रूपं अवेहि परमं हि तत् ॥१०९॥
अनुभूतं तदस्माभिर्ज्ञाते प्राकृतिके लये।
अक्षरात् परतस्तस्माद्यत् परं केवलो रसः[1]।
न च तत्र वयं शक्ताः शब्दातीते तदात्मकाः ॥११०॥
इति श्रीमहापुराणे वायुप्रोक्ते अनुषङ्गपादे व्याससंशयापनोदनं नाम द्विचत्वारिंशोऽध्यायः।

(१) हि सः इति पाठः साधुः।

अथ त्रिचत्वारिंशोऽध्यायः[१]।

गयामाहात्म्यं ।

वायुरुवाच । अत ऊर्द्धं प्रवक्ष्यामि गयामाहात्म्यमुत्तमं ।
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्रसंशयः ॥१॥
सूतउवाच । सनकाद्यैर्महाभागैर्देवर्षिः स च नारदः ।
सनत्कुमारं पप्रच्छ प्रणम्य विधिपूर्व्वकं[२] ॥२॥
नारद उवाच । सनत्कुमार मे ब्रूहि तीर्थं तीर्थोत्तमोत्तमं ।
तारकं सर्व्वभूतानां पठतां शृण्वतां तथा ॥३॥
सनत्कुमार उवाच । वक्ष्ये तीर्थवरं[३] पुण्यं श्राद्धादौ सर्व्वतारकं ।

---

(१) ख॰ ग॰ आदर्शपुस्तकयोर्गयामाहात्म्येऽध्यायसंख्या न दृश्यते। मुद्रितपुस्तके तु गयामाहात्म्याध्यायेषु प्रथमद्वितीयतृतीय इत्यादिसंख्याः सन्ति। अस्मिन् पुस्तके क्रमानुरोधात् त्रिचत्वारिंशपञ्चचत्वारिंशइत्यादिसंख्याभिर्गयामाहात्म्यं मुद्रयामः ।

(२) गयायात्रां प्रवक्ष्यामि शृणु नारद मुक्तिदां ।
निष्कृतिस्त्विह कर्त्तृणां ब्रह्मणा गीयते पुरा ॥ १ ॥
ब्रह्मज्ञानं गयाश्राद्धं गोगृहे मरणं तथा ।
वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा ॥ २ ॥
ब्रह्मज्ञानेन किं कार्य्यं गोगृहे मरणेन किं ।
किं कुरुक्षेत्रवासेन यदि पुत्रो गयां व्रजेत् ॥ ३ ॥
गयायां पिण्डदानेन यत्फलं लभते नरः ।
न तच्छक्यं मया वक्तुं कल्पकोटिशतैरपि ॥ ४ ॥
इति श्रुत्वा तदा वाक्यं नारदो मुनिसत्तमः ।
सनत्कुमारं पप्रच्छ प्रणम्य विधिपूर्व्वकं ॥ ५ ॥
इति पाठो मुद्रितपुस्तके वर्त्तते ।

(३) तीर्थं परमिति मुद्रितपु॰ ।

गयातीर्थं सर्व्वदेशे[1] तीर्थेभ्योऽप्यधिकं शृणु ॥४॥
गयासुरस्तपस्तेपे ब्रह्मणा क्रतवेऽर्थितः ।
प्राप्तस्य तस्य शिरसि शिलां धर्म्मो ह्यधारयत्[2] ॥५॥
तत्र ब्रह्माऽकरोद्यागं स्थितश्चापि गदाधरः[3] ।
फल्गुतीर्थादिरूपेण निश्चलार्थमहर्निशं ।
गयासुरस्य विप्रेन्द्र ब्रह्माद्यैर्देवतैः सह[4] ॥६॥
कृतयज्ञो ददौ ब्रह्मा ब्राह्मणेभ्यो गृहादिकं ।
श्वेतकल्पे तु वाराहे गयायागमकारयत् ॥७॥
गयानाम्ना गया ख्याता[5] क्षेत्रं ब्रह्माभिकाङ्क्षितं[6] ।
काङ्क्षन्ति पितरः पुत्रान्नरकाद्भयभीरवः ॥८॥
गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति ।
गयाप्राप्तं सुतं दृष्ट्वा पितॄणामुत्सवो भवेत् ।
पद्भ्यामपि जलं स्पृष्ट्वा सोऽस्मभ्यं किं न दास्यति ॥९॥
गयां गत्वान्नदाता यः पितरस्तेन पुत्रिणः ।
पक्षत्रयनिवासी च पुनात्यासप्तमं कुलं ।
नो चेत् पञ्चदशाहं वा सप्तरात्रं त्रिरात्रिकं[7] ॥१०॥

---

(१) गयातीर्थन्तु विप्रेन्द्र इति मुद्रितपु०।
(२) गयासुरस्तपस्तेपे ब्रह्मा तत्र जगाम ह। बलेन पातयित्वोर्व्व्यां शिलां तन्मूर्ध्न्यधारयत्। इति मुद्रितपु०।
(३) स्थापयित्वा गदाधरमिति मुद्रितपु० ॥
(४) गयासुरस्य विप्रेन्द्र एतच्छ्लोकार्द्धं न साधु, मुद्रितपुस्तकेऽपि न विद्यते।
(५) गयाख्यानमिति मुद्रितपु०।
(६) ब्रह्मर्षिकाङ्क्षितमिति मुद्रितपु०।
(७) एतच्छ्लोकार्द्धं मुद्रितपुस्तके न दृश्यते।

महाकल्पकृतं पापं गयां प्राप्य विनश्यति ।
पिण्डं दद्याच्च पित्रादेरात्मनोऽपि तिलैर्विना ॥११॥
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
पापं तत् सङ्गजं सर्व्वं गयाश्राद्धाद्विनश्यति[1] ॥१२॥
आत्मजोऽप्यन्यजो[2] वापि गयाभूमौ[3] यदा तदा ।
यन्नाम्ना पातयेत्पिण्डं तन्नयेद्ब्रह्म शाश्वतं ॥१३॥
ब्रह्मज्ञानं गयाश्राद्धं गोगृहे मरणं तथा ।
वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्व्विधा ॥१४॥
ब्रह्मज्ञानेन किं कार्य्यं गोगृहमरणेन किं ।
वासेन किं कुरुक्षेत्रे यदि पुत्रो गयां व्रजेत् ॥१५॥
गयायां सर्व्वकालेषु पिण्डं दद्याद्विचक्षणः ।
अधिमासे जन्मदिने चास्तेऽपि गुरुशुक्रयोः ॥१६॥
न त्यक्तव्यं गयाश्राद्धं सिंहस्थेऽपि बृहस्पतौ ।
तथा दैवप्रमादेन सुप्रवृत्तसु[4] ग्रहेषु च ।
पुनः कर्म्माधिकारी च श्राद्धकृद्ब्रह्मलोकभाक्[5] ॥१७॥
सकृद्गयाभिगमनं सकृत्पिण्डस्य पातनं[6] ।

---

(१) ब्रह्महत्यासुरापानमित्यादिगयाश्राद्धाद्विनश्यतीत्यन्तपाठो मुद्रित-पुस्तके न विद्यते।
(२) आत्मजस्त्वान्यजो इति मुद्रितपु० ।
(३) गयाश्राद्धे इति मुद्रितपु० ।
(४) प्रवृत्तेषु इति पाठः समीचीनः। सुमवृत्तसु इति वा पाठः।
(५) मुद्रितपुस्तके एतच्छ्लोकाभावो वर्त्तते ।
(६) पिण्डप्रपातनमिति मुद्रितपु० ।

दुर्लभं किं पुनर्नित्यमस्मिन्नेव व्यवस्थितिः ॥१८॥
प्रमादान्म्रियते क्षेत्रे ब्रह्मादेर्मुक्तिदायके[१] ।
ब्रह्मज्ञानाद्यया मुक्तिर्लभ्यते नात्र संशयः ॥१९॥
कीकटादिमृतानाञ्च पितॄणां तारणाय च ।
तस्मात् सर्व्वप्रयत्नेन कर्त्तव्यं सुविचक्षणैः ॥२०॥
ब्रह्मप्रकल्पितान् विप्रान् हव्यकव्यादिनाऽर्च्चयेत् ।
तैस्तुष्टैस्तोषिताः सर्व्वाः पितृभिः सह देवताः ॥२१॥
मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः ।
वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयां ॥२२॥
दण्डं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिण्डदः ।
दण्डं न्यस्ता[२] विष्णुपदे पितृभिः सह मुच्यते ॥२३॥
न दण्डी किल्विषं धत्ते पुण्यं[३] वा परमार्थतः ।
अतः सर्व्वां क्रियां त्यक्त्वा विष्णुं ध्यायति भावुकः ॥२४॥
सन्न्यसेत सर्व्वकर्म्माणि वेदमेकं न सन्न्यसेत्[४] ।
मुण्डं कुर्य्याच्च पूर्व्वेऽस्मिन् पश्चिमे दक्षिणोत्तरे ॥२५॥
सार्द्धक्रोशद्वयं मानं गयेति ब्रह्मणेरितं ।
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ॥२६॥
तन्मध्ये सर्व्वतीर्थानि त्रैलोक्ये यानि सन्ति वै ।

---

(१) मुक्तिदायकमिति मुद्रितपु० ।
(२) स्पृष्ट्वा इति मुद्रितपु० ।
(३) पुण्यमिति पाठः साधीयान् ।
(४) न दण्डीत्यादि वेदमेकं न सन्न्यसेदित्यन्तपाठो मुद्रितपुस्तके नापलोक्यते ।

श्राद्धकृद्यो गयाक्षेत्रे पितॄणामनृणो हि सः ॥२७॥
शिरसि श्राद्धकृद्यस्तु[१] कुलानां शतमुद्धरेत् ।
गृहाच्चलितमात्रेण गयायां गमनं प्रति ।
स्वर्गारोहणसोपानं पितॄणाञ्च पदे पदे ॥२८॥
पदे पदेऽश्वमेधस्य यत्फलं गच्छतो गयां[२] ।
तत्फलञ्च भवेन्नूनं[३] समग्रं नात्र संशयः ॥२९॥
पायसेनापि चरुणा सक्तुना पिष्टकेन वा ।
तण्डुलैः फलमूलाद्यैर्गयायां पिण्डपातनं[४] ॥३०॥
तिलकल्केन खण्डेन गुडेन सघृतेन वा ।
केवलेनैव दध्ना वा ऊर्जेन मधुनाऽथ वा ॥३१॥
पिण्याकं सघृतं खण्डं पितृभ्योऽक्षयमित्युत ।
इष्यते वाऽन्नेवं भोज्यं हविष्याश्च मुनीरितं ॥३२॥
एकतः सर्व्ववस्त्रानि रसवन्ति मधूनि हि ।
स्नात्वा गदाधराङ्घ्र्यब्जं फल्गुतीर्थाम्बु चैकतः ॥३३॥
पिण्डासनं पिण्डदानं पुनः प्रत्यवनेजनं ।
दक्षिणा चान्नसङ्कल्पस्तीर्थश्राद्धेष्वयं विधिः ॥३४॥
नावाहनं न दिग्बन्धो[५] न दोषो दृष्टिसम्भवः ।

(१) यः स इति मुद्रितपु० ।
(२) भवेदिति मुद्रितपु० ।
(३) लभते नूनमिति मुद्रितपु० ।
(४) पिण्डदो भवेदिति मुद्रितपु० ।
(५) नाग्निदग्धो इति पाठोऽत्र सम्भाव्यते ।

सकारणेन[१] कर्त्तव्यं तीर्थश्राद्धं विचक्षणैः ॥३५॥
अन्यथावाहिताः काले पितरो यान्त्यमुं प्रति ।
तीर्थे सदा वसन्त्येते तस्मादावाहनं न हि ॥३६॥
तीर्थश्राद्धं प्रयच्छद्भिः पुरुषैः फलकाङ्क्षिभिः ।
कामं क्रोधं तथा लोभं त्यक्त्वा कार्य्या क्रियाऽनिशं ॥३७॥
ब्रह्मचार्य्येकभोजी च भूशायी सत्यवाक् शुचिः ।
सर्व्वभूतहिते रक्तः स तीर्थफलमश्नुते ॥३८॥
तीर्थान्यनुसरन् धीरः पाषण्डं पूर्व्वतस्त्यजेत् ।
पाषण्डः स च विज्ञेयो यो भवेत् कामकारकः ॥३९॥
तीर्थेषु ये नरा धीराः कर्म्म कुर्व्वन्ति तद्गताः ।
यथा ब्रह्मविदो वेदं वस्तु चानन्यचेतसः ।
प्रविशन्ति परे शाख्यं ब्रह्म ब्रह्मपरायणाः ॥४०॥
यास्ते वैतरणी नाम नदी त्रैलोक्यविश्रुता ।
साऽवतीर्णा गयाक्षेत्रे पितॄणां तारणाय वै ।
स्नातो गोदो वैतरण्यां त्रिःसप्तकुलमुद्धरेत् ॥४१॥
तथाऽक्षयवटं गत्वा विप्रान् सन्तोषयिष्यति ।
ब्रह्मप्रकल्पितान् विप्रान् हव्यकव्यादिनाऽर्च्चयेत्[२] ।
तैस्तुष्टैस्तोषिताः सर्व्वाः पितृभिः सह देवताः ॥४२॥
गयायां न हि तत् स्थानं यत्र तीर्थं न विद्यते ।

---

(१) सकारणैर्म्म इति पाठः सङ्गतः ।
(२) मुद्रितपुस्तके,—तिलकल्केन खण्डेन इत्यादि हव्यकव्यादिनार्च्चये-दित्यन्तं पाठो न विद्यते ।

सान्निध्यं सर्व्वतीर्थानां गयातीर्थे ततो वरं ॥४३॥
मीने मेषे स्थिते सूर्य्ये कन्यायां कार्मुके घटे।
दुर्लभं त्रिषु लोकेषु गयायां पिण्डपातनं ॥४४॥
मकरे वर्त्तमाने च ग्रहणे चन्द्रसूर्य्ययोः।
दुर्लभं त्रिषु लोकेषु गयाश्राद्धं सुदुर्लभं ॥४५॥
गयायां पिण्डदानेन यत् फलं लभते नरः।
न तच्छक्यं मया वक्तुं कल्पकोटिशतैरपि ॥४६॥

इति श्रीमहापुराणे वायुप्रोक्ते गयामाहात्म्यं नाम
त्रिचत्वारिंशोऽध्यायः समाप्तः।

अथ चतुश्चत्वारिंशोऽध्यायः।

गयामाहात्म्यं।

नारद उवाच। गयासुरः कथं जातः किंप्रभावः किमात्मकः।
तपस्तप्तं कथं तेन कथं देवपवित्रता ॥१॥
सनत्कुमार उवाच। विष्णोर्नाभ्यम्बुजाज्जातो ब्रह्मा लोकपितामहः।
प्रजाः ससर्ज संप्रोक्तः पूर्वदेवेन विष्णुना ॥२॥
आसुरेणैव भावेन असुरानसृजत् पुरा।
सौमनस्येन भावेन देवान् सुमनसोऽसृजत् ॥३॥
गयासुरोऽसुराणाञ्च महाबलपराक्रमः।
योजनानां सपादञ्च शतं तस्योच्छ्रयः स्मृतः ॥४॥
स्थूलः षष्टियोजनानां श्रेष्ठोऽसौ वैष्णवः स्मृतः।
कोलाहलगिरिवरे तपस्तेपे सुदारुणं ॥५॥
बहुवर्षसहस्राणि निरुच्छ्वासं स्थिरो[२]ऽभवत्।
तत्तपस्तापिता देवाः संक्षोभं परमं गताः[३] ॥६॥
ब्रह्मलोकं गता देवाः प्रोचुस्तेऽथ पितामहं[४]।
गयासुराद्रक्ष देव ब्रह्मा देवांस्ततोऽब्रवीत् ॥७॥

---

(२) स्थितो इति मुद्रितपु०।
(३) ययुरिति मुद्रितपु०।
(४) ऊचुस्ते प्रपितामहमिति मुद्रितपु०।

व्रजामः शङ्करं देवा ब्रह्माद्याश्च गताः शिवं ।
कलासे चाब्रुवन्नत्वा रक्ष देव महासुरात् ॥८॥
ब्रह्माद्यानब्रवीच्छम्भुर्व्रजामः शरणं हरिं ।
क्षीराब्धौ देवदेवेशः स नः श्रेयो विधास्यति ।
ब्रह्मा महेश्वरो देवा विष्णुं नत्वा प्रतुष्टुवुः[१] ॥९॥
देवा ऊचुः । नमो विष्णवे भर्त्रे सर्व्वेषां प्रभविष्णवे ।
रोचिष्णवे जिष्णवे च राक्षसादिग्रसिष्णवे ॥१०॥
धरिष्णवेऽखिलस्यास्य योगिनां पारयिष्णवे ।
वर्द्धिष्णवे ह्यनन्ताय नमो भ्राजिष्णवे नमः[२] ॥११॥
सनत्कुमार उवाच । एवं स्तुतो वासुदेवः सुराणां दर्शनं ददौ ।
किमर्थमागता देवा विष्णुनोक्तास्तमब्रुवन् ॥१२॥
गयासुरभयाद्देव रक्षास्मानब्रवीद्धरिम् ।
ब्रह्माद्या यान्तु तं दैत्यमागमिष्याम्यहं ततः ॥१३॥
केशवो गरुड़ारूढो वरं दातुं गयासुरे ।
सर्व्वे स्वं स्वं समास्थाय ययुर्वाहन[३] मुत्तमं ॥१४॥

---

(१) नत्वा तु तुष्टुवुरिति मुद्रितपु० ।
(२) नमो विष्णवे भर्त्रे सर्व्वेषां प्रभविष्णवे ।
रोचिष्णवे ह्यनन्ताय नमो भ्राजिष्णवे नमः ॥ १० ॥
सहिष्णवे जिष्णवे च राक्षसादिग्रसिष्णवे ।
वर्द्धिष्णवेऽखिलस्यास्य योगिनां पारयिष्णवे ॥ ११ ॥ इति मुद्रितपु० ।
(३) निजवाहनमिति ख० ग० ।

ऊचुस्तं वासुदेवाद्याः किमर्थं तप्यते त्वया ।
सन्तुष्टाः स्वागताः सर्व्वे वरं ब्रूहि गयासुर ॥१५॥
गयासुर उवाच । यदि तुष्टाः स्थ मे देवा ब्रह्मविष्णुमहेश्वराः ।
सर्व्वदेवद्विजातिभ्यो यज्ञतीर्थशिलोच्चयात् ॥१६॥
देवेभ्योऽतिपरित्रोऽहमृषिभ्योऽपि शिवाव्ययात्[1] ।
मन्त्रेभ्यो देवदेवीभ्यो योगिभ्यश्चापि सर्व्वशः ॥१७॥
न्यासिभ्यश्चापि कर्म्मिभ्यो धर्म्मिभ्यश्च तथा पुनः ।
ज्ञातिभ्योऽतिपवित्रेभ्यः पवित्रः स्यां सदा सुराः[2] ॥१८॥
पवित्रमस्तु तं देवाः दैत्यमुक्त्वा ययुर्दिवं ।
दैत्यं दृष्ट्वा च स्पृष्ट्वा च सर्व्वे हरिपुरं ययुः ॥१९॥
शून्यं लोकत्रयं जातं शून्या यमपुरी त्वभूत् ।
यम इन्द्रादिभिः सार्द्धं ब्रह्मलोकं ततोऽगमत् ॥२०॥
ब्राह्माणमूचिरे देवा गयासुरविलोपिताः ।
त्वया दत्तोऽधिकारो वै गृहाण त्वं पितामह ॥२१॥
ब्रह्माब्रवीत्ततो देवान् व्रजामो विष्णुमव्ययं ।

---

(१) शिलोच्चयात् इति पाठः साधुः ।

(२) यदि तुष्टाः शरीरं मे ब्रह्मविष्णुमहेश्वरात् ।
सर्व्वदेवद्विजातिभ्यो यज्ञतीर्थशिलोच्चयात् ।
देवेभ्योऽतिपवित्रेभ्यः पवित्रतममस्तु च ॥ १६ ॥ इति पाठो मुद्रितपुस्तके वर्त्तते । तत्र, यदि तुष्टाः स्थ इत्यादि पवित्रः स्यां सदा सुराः इत्यन्तपाठाभावो दृश्यते ।

ब्रह्मादयोऽब्रुवन् विष्णुं त्वया दत्तवरेऽसुरे[1] ॥२२॥
तद्दर्शनाद्ययुः स्वर्गं शून्यं लोकत्रयं ह्यभूत्।
देवैरुक्तो वासुदेवो ब्रह्माणं स वचो[2]ऽब्रवीत् ॥२३॥
गत्वासुरं[3] प्रार्थयस्व यज्ञार्थं देहि देहकं।
विष्णूक्तः ससुरो ब्रह्मा गत्वाऽपश्यन्महासुरं ॥२४॥
गयासुरोऽब्रवीद्दृष्ट्वा ब्रह्माणं त्रिदशैः सह।
संपूज्योत्थाय विधिवत् प्रणतः श्रद्धयान्वितः ॥२५॥
गयासुर उवाच। अद्य मे सफलं जन्म अद्य मे सफलं तपः।
यदागतोऽतिथि र्ब्रह्मा सर्व्वं प्राप्तं मयाद्य वै ॥२६॥
योगिन् योगाङ्गवित् सर्व्वलोकस्वामिन् पितर्गुरो[4]।
यदर्थमागतो ब्रह्मंस्तत् कार्य्यं करवाण्यहं[5] ॥२७॥
ब्रह्मोवाच। पृथिव्यां यानि तीर्थानि दृष्टानि भ्रमता मया।
यज्ञार्थं न तु ते तानि पवित्राणि शरीरतः ॥२८॥
त्वया देहे पवित्रत्वं प्राप्तं विष्णुप्रसादतः।
अतः पवित्रं देहं त्वं यज्ञार्थं देहि मेऽसुर ॥२९॥
गयासुर उवाच। धन्योऽहं देवदेवेश यद्देहं प्रार्थ्यते त्वया।
पितृवंशः कृतार्थो मे देहे यागं करोषि चेत्[6] ॥३०॥

---

(१) दत्तवरोऽसुरः इति मुद्रितपु०।
(२) ब्रह्माणञ्च ततो इति मुद्रितपु०।
(३) गयासुरमिति मुद्रितपु०।
(४) एतच्छ्लोकार्द्धं मुद्रितपुस्तके न विद्यते।
(५) करवाणि ते इति मुद्रितपु०।
(६) पितृवंशे कृतार्थोऽहं मातृवंशे तथैव च। इति ख० ग०।

त्वयैवोत्पादितो देहः पवित्रस्तु त्वया कृतः[१] ।
सर्व्वेषामुपकाराय यागोऽवश्यं भविष्यति[२] ।२१॥
इत्युक्त्वा सोऽपतद्भूमौ श्वेतकल्पे गयासुरः ।
नैऋंतीन्दिशमाश्रित्य तदा कोलाहले गिरौ ॥२२॥
शिरः कृत्वोत्तरे दैत्यः पादौ कृत्वा तु दक्षिणे ।
ब्रह्मा सम्भृतसम्भारो मानसानृत्विजोऽसृजत् ॥२३॥
अग्निशर्म्माणमसृतं शौनकं याज्ञवल्क्यं मृदुं ।
कुसुथिं वेदकौण्डिन्यं हारीतं काश्यपं कृपं ॥२४॥
गर्गं कौशिकवाशिष्ठौ मुनिं भार्गवमव्ययं ।
वृद्धं पाराशरं कण्वं माण्डव्यं श्रुतिकेवलं ।२५॥
श्वेतं सुतालं दमनं सुहोत्रं कङ्कमेव च ।
लौकाक्षिञ्च महाप्राज्ञं जैगीषव्यं तथैव च ॥२६॥
दधिपञ्चमुखं विप्रमृषभं कर्कमेव च ।
कात्यायनं गोभिलञ्च मुनिमुग्रमहाव्रतं ॥२७॥
सुपालकं गौतमञ्च तथा वेदशिरोव्रतं ।
जटामालिनमव्ययं चाट्टहासञ्च दारुणं ॥२८॥
आत्रेयं चाप्यङ्गिरसमौपमन्युं महाव्रतं ।
गोकर्णञ्च गुहावासं शिखण्डिनमुमाव्रतं ॥२९॥
एतानन्यांश्च विप्रेन्द्रान् वेधा लोकपितामहः[३] ।

---

(१) तथैवास्तूपकारश्च इति मुद्रितपु० ।

(२) भविष्यति इति मुद्रितपु० ।

(३) अग्निशर्म्माणममृतं इत्यादि वेधा लोकपितामहः इत्यन्तं सार्द्धषट्-श्लोका मुद्रितपुस्तके न सन्ति ।

परिकल्प्याकरोद्यागं गयासुरशरीरके ॥४०॥
अग्निशर्म्मापि पञ्चाग्नीन् मुखादेतानथासृजत्।
दक्षिणाग्निं गार्हपत्याहवनीयौ तपोऽव्ययः ॥४१॥
सत्यावसथ्यौ देवर्षे येषु यज्ञाः प्रतिष्ठिताः[१]।
यज्ञस्य च प्रतिष्ठार्थं विप्रेभ्यो दक्षिणां ददौ ॥४२॥
कृत्वा पूर्णाहुतिं ब्रह्मा स्नात्वा चावभृथेन तु।
यज्ञयूपं सुरैः सार्द्धं समानीय व्यरोपयत्[२] ॥४३॥
ब्रह्मणः सरसी श्रेष्ठे सरस्येवाश्रितं शुभं[३]।
चलितश्चकितो ब्रह्मा धर्मराजमभाषत ॥४४॥
आस्ते गृहे तव शिला[४] समानीयाविचारयन्।
दैत्यस्य शीर्षं शिरसि तां धारय ममाज्ञया ॥४५॥
निश्चलार्थं यमः श्रुत्वाधारयन्मस्तके शिलां।
शिलायां धारितायान्तु सशिलश्चासुरोऽचलत्[५] ॥४६॥
देवानुवाच रुद्रादीन् शिलायां निश्चलाः किल[६]।
तिष्ठन्तु देवाः सकला[७]स्तथेत्युक्त्वा च ते स्थिताः ॥४७॥
देवाः पादैर्लङ्घयित्वा तथापि चलितोऽसुरः।

---

(१) अग्निशर्म्मापि पञ्चाग्नीनित्यादि येषु यज्ञाः प्रतिष्ठिताः इत्यन्तं सार्द्धैकश्लोको मुद्रितपुस्तके न विद्यते।
(२) यज्ञवाटे सुरैः सार्द्धं गयासुरमपश्यत। इति मुद्रितपु०।
(३) एतच्छ्लोकार्द्धं मुद्रितपुस्तके न विद्यते।
(४) यास्ते गृहे धर्म्मशिला इति मुद्रितपु०।
(५) चलितोऽसुरः इति मुद्रितपु०।
(६) सदा इति मुद्रितपु०।
(७) तिष्ठध्वं निश्चलार्थं वै इति मुद्रितपु०।

ब्रह्माथ व्याकुलो विष्णुं गतः क्षीराब्धिशायिनं ।
तुष्टाव प्रणतो भूत्वा नत्वा चादृत्य तं प्रभुं[१] ॥४८॥
ब्रह्मोवाच। ब्रह्माण्डस्य पते नाथ[२] नमामि जगतां पतिं ।
गतिं कीर्त्तिमतां नृणां भुक्तिमुक्तिप्रदायकं ॥४९॥
विष्वक्सेनोऽब्रवीद्विष्णुं देव त्वां स्तौति पद्मजः ।
हरिराह्वानय त्वं तं विष्वक्सेनः स तमानयत् ।
अब्जमूचे हरिः कस्मादागतोऽसि वदस्व तत् ॥५०॥
ब्रह्मोवाच। देवदेव कृते यागे प्रचचाल गयासुरः ।
शिलायां देवरूपिण्यां न्यस्तायां तस्य मस्तके ॥५१॥
रुद्रादिषु च देवेषु संस्थितेष्वसुरोऽचलत् ।
इदानीं निश्चलार्थं हि प्रसादं कुरु माधव ॥५२॥
ब्रह्मणो वचनं श्रुत्वा समाकृष्य स्वशरीरतः ।
मूर्त्तिं ददौ निश्चलार्थं ब्रह्मणे भगवान् हरिः ॥५३॥
आनीय मूर्त्तिं ब्रह्मापि शिलायां समधारयत्[३] ।
तथापि चलितं वीक्ष्य पुनर्देवमथाह्वयत् ॥५४॥
आगत्य विष्णुः क्षीराब्धेः शिलायां संस्थितोऽभवत् ।
जनार्द्दनाभिधानेन पुण्डरीकेतिनामतः ।
शिलायां निश्चलार्थं हि स्वयमादिगदाधरः[४] ॥५५॥

---

(१) विष्णुं त्रिजगतां पतिमिति मुद्रितपु०।
(२) ब्रह्माण्डस्य पतिं नाथमिति मुद्रितपु०।
(३) तामधारयदिति मुद्रितपु०।
(४) जनार्द्दनाधिष्ठानेन पुण्डरीकाख्यनामतः। शिलायां निश्चलार्थं स
स्वयमेव गदाधरः। इति मुद्रितपु०।

निश्चलायैं पञ्चधामीच्छिलायां प्रपितामहः ।
पितामहोऽथ फल्गीशः केदारः कनकेश्वरः ॥५६॥
ब्रह्मा स्थितः स्वयं तत्र गजरूपी[1] विनायकः ।
गयादित्यश्चोत्तरार्को दक्षिणार्कस्त्रिधा रविः ॥५७॥
लक्ष्मीः सीताभिधानेन गौरी च[2] मङ्गलाह्वया ।
गायत्री चैव सावित्री त्रिसन्ध्या च सरस्वती ॥५८॥
इन्द्रो बृहस्पतिः पूषा वसवोऽष्टौ महाबलाः ।
विश्वेदेवास्त्वाश्विनेयौ मारुतो विघ्ननायकः ॥
यक्षोरगगन्धर्वास्तस्थुर्देवाः स्वशक्तिभिः[3] ॥५९॥
आद्यया गदया चासौ यस्माद्दैत्यः स्थिरीकृतः ।
स्थित इत्येव हरिणा तस्मादादिगदाधरः ॥६०॥
ऊचे गयासुरो देवान् किमर्थं वञ्चितो ह्यहं[4] ।
यज्ञार्थं ब्रह्मणे दत्तं शरीरमव्ययं[5] मया ।
विष्णोर्वचनमात्रेण किं न स्यां निश्चलो ह्यहं ॥६१॥
यत्सुरैः पीडितोऽत्यर्थं गदया हरिणा तथा ।
पीडितो यद्यहं देवाः प्रसन्नाः सन्तु सर्वदा[6] ॥६२॥
गदाधरादयस्तुष्टाः प्रोचुः सार्द्धं गयासुरं ।

---

(१) गजरूपो इति मुद्रितपुं ।
(२) स्थि॰ वै इति ख॰ ग॰ ।
(३) इन्द्रो बृहस्पतिरित्यादि तस्थुर्देवाः स्वशक्तिभिरित्यन्तपाठाभावो मुद्रितपुस्तके वर्त्तते ।
(४) वञ्चितोऽस्म्यहमिति मुद्रितपुं ।
(५) ममलमिति मुद्रितपुं ।
(६) वै सदा इति मुद्रितपुं ।

वरं ब्रूहि प्रसन्नाः स्मो देवानूचे गयासुरः ॥६३॥
यावत् पृथ्वी पर्वताश्च यावच्चन्द्रार्कतारकाः ।
तावच्छिलायां तिष्ठन्तु ब्रह्मविष्णुमहेश्वराः ।
अन्ये च सकला देवा मन्नाम्ना क्षेत्रमस्तु वै ॥६४॥
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
तन्मध्ये सर्वतीर्थानि प्रयच्छन्तु हितं नृणां ॥६५॥
स्नानादितर्पणं कृत्वा पिण्डदानात् फलाधिकम् ।
महात्मनि[१]सहस्रञ्च कुलानां चोद्धरेश्वरः ॥६६॥
व्यक्ताव्यक्तस्वरूपेण यूयं तिष्ठत सर्वदा ।
गदाधरः स्वयं लोकाद्भयात् सर्वाघनाशनात्[२] ॥६७॥
श्राद्धं सपिण्डकं येषां ब्रह्मलोकं प्रयान्तु ते ।
ब्रह्महत्यादिकं पापं विनश्यतु च सेविनां ॥६८॥
नैमिषं पुष्करं गङ्गा प्रयागञ्चाविमुक्तिकं ।
एतान्यन्यानि तीर्थानि दिवि भुव्यन्तरिक्षतः ।
समायान्तु सदा नृणां प्रयच्छन्तु हितं सुराः ॥६९॥
किम्बहुना सुरगणा युष्माभिश्चैकापि देवता ।
चेन्न तिष्ठेदहं चापि समयः प्रतिपाल्यतां[३] ॥७०॥

---

(१) महात्मा वै इति पाठो विशुद्धः।

(२) सर्वाघनाशनः इति पाठो विशुद्धः।

(३) महात्मनि सहस्रञ्च इत्यादि समयः प्रतिपाल्यतामित्यन्तपाठो मुद्रितपुस्तके न दृश्यते। अस्मिन् स्थले, गङ्गाद्याश्च महानद्यः सरांसि विविधानि च। ते देवास्तानि तीर्थानि प्रयच्छन्तु हितं नृणां। पितॄणां ब्रह्मलोकञ्च भुक्तिमुक्तिफलन्तथा ॥५३॥ एको विष्णुस्त्रिधामूर्त्तिर्यावत्संकीर्त्यते बुधैः। तावद् गयासुरक्षेत्रं ख्यातिमेतु सदा भुवि। ब्रह्महत्यादिकं पापं विनाशयतु सेवितं ॥५४॥ इति पाठो वर्त्तते।

गयासुरवचः श्रुत्वा प्रोचुर्विष्णादयः सुराः ।
त्वया यत्प्रार्थितं सर्व्वं तद्भविष्यत्यसंशयं ॥७१॥
[1]अस्मत्पादानर्चयित्वा यास्यन्ति परमां गतिं ।
देवैर्दत्तवरो दैत्यो हर्षितो निश्चलोऽभवत् ॥७२॥
स्थितेषु चैव[2] देवेषु ब्राह्मणेभ्यो ददावजः[3] ।
ग्रामांश्च पञ्चपञ्चाशत् पञ्चक्रोशीं गयां तथा ।
गृहान् कृत्वा ददौ दिव्यान् सर्व्वोपस्करसंयुतान् ॥७३॥
कामधेनुं कल्पवृक्षं पारिजातादिकांस्तरून् ।
महानदीं क्षीरवहां घृतकुल्यास्तथैव च[4] ॥७४॥
मधुस्रवां मधुकुल्यां दध्याद्याज्यसरांसि च ।
सुवर्णदीर्घिकां चैव वह्नन्नादिपर्व्वतान् ॥७५॥
भक्ष्यभोज्यफलादींश्च सर्व्वं ब्रह्मा सृजन् ददौ ।
न याचयध्वं विप्रेन्द्रा अन्यानुक्त्वा ददावजः ॥७६॥
दत्वा ययौ ब्रह्मलोकं गत्वा ह्यादिगदाधरं ।
धर्म्मारण्ये तत्र धर्म्मं याजयित्वा ययाचिरे ॥७७॥
धर्म्मयागे च लोभाद्वै प्रतिगृह्य धनादिकं ।

---

(१) अस्मत्पादानर्चयित्वा इति श्लोकार्द्धात् प्राक्, पितृणां वै कुलशत-मात्मानं पिण्डदानतः । श्राद्धादिना नयिष्यन्ति ब्रह्मलोकमनामयमिति पाठो मुद्रितपुस्तके दृश्यते ।

(२) तत्र इति मुद्रितपु० ।

(३) ह्यजः इति मुद्रितपु० ।

(४) घृतकुल्यादिकांस्तथा इति मुद्रितपु० ।

ततो ब्रह्मा समागत्य ब्राह्मणांस्तान् शशाप ह ॥७८॥
कृतवन्तो यतो लोभं मद्दत्तेष्वखिलेष्वपि ।
तस्माद्गुणाधिका यूयं भविष्यन्ति[1] सदा द्विजाः ॥७९॥
युष्माकं स्वादरहिता नदी पाषाणपर्व्वताः[2] ।
नद्यादयो वारिवहा रूप्यमयाश्च तथा[3] गृहाः ॥८०॥
कामधेनुः कल्पवृक्षो मलोकसुपतिष्ठतां ।
एवं शप्ता ब्रह्मणा ते प्रार्थयन्तोऽब्रुवन्नजं ॥८१॥
त्वया यद्दत्तमखिलं तत्सर्व्वं शापतो गतम् ।
जीवनार्थं प्रसादं नो भगवन् कर्त्तुमर्हसि ॥८२॥
तच्छ्रुत्वा ब्राह्मणान् ब्रह्मा प्रोवाचेदं दयान्वितः ।
तीर्थोपजीविका यूयमाचन्द्रार्कं भविष्यथ ॥८३॥
लोकाः पुण्या गयायां ये श्राद्धिनो ब्रह्मलोकगाः ।
युष्मान् ये पूजयिष्यन्ति तैरहं पूजितः सदा[4] ॥८४॥
आक्रान्तं दैत्यजठरं धर्म्मेण विरजाद्रिणा ।

---

(१) तस्मादद्यप्रभृत्याकं भविष्यति इति मुद्रितपु० ।
(२) युष्माकमिति श्लोकार्द्धस्थले विद्याविवर्ज्जिता यूयमन्नान्युपलपर्व्वताः । इति पाठो मुद्रितपुस्तके वर्त्तते ।
(३) गृहाद्याः प्रचुरा इति ख० ग० ।
(४) लोकाः पुण्या गयायां ये इति श्लोकस्थले मुद्रितपुस्तके,
ये युष्मान् पूजयिष्यन्ति गयायामागता नराः ।
हव्यकव्यैर्धनैः श्राद्धैस्तेषां कुलशतं व्रजेत् ।
नरकात् स्वर्गलोकाय स्वर्गलोकात् परां गतिं ॥ ९० ॥ इति पाठो वर्त्तते ।

नाभिकूपसमीपे तु देवी या[१] विरजा स्थिता।
तत्र पिण्डादिकं कृत्वा त्रिःसप्तकुलमुद्धरेत् ॥ ८५ ॥
महेन्द्रगिरिणा तस्य कृतौ पादौ सुनिश्चलौ।
तत्र पिण्डादिकृत्सप्तकुलान्युद्धरते नरः[२] ॥ ८६ ॥

इति श्रीमहापुराणे वायुप्रोक्ते[३] गयामाहात्म्यं नाम
चतुश्चत्वारिंशोऽध्यायः समाप्तः।

---

(१) देवी चेति ख० ग०।
(२) महेन्द्रगिरिणा तस्य इति श्लोको मुद्रितपुस्तके न विद्यते।
(३) श्वेतवराहकल्पे इति मुद्रितपु०।

पञ्चचत्वारिंशोऽध्यायः ।

गयामाहात्म्यं ।

नारद उवाच। कथं शिला समुत्पन्ना यथाक्रान्तो गयासुरः ।

किं रूपं किं च माहात्म्यं तस्याः किं वद नाम च ॥१॥

सनत्कुमार उवाच[१]। आसीद्धर्म्मो महातेजाः सर्व्वविज्ञानपारगः ।

विश्वरूपा च तत्पत्नी भर्त्तृव्रतपरायणा ॥ २ ॥

तस्यां धर्म्मात् समुत्पन्ना कन्या धर्म्मव्रता सती ।

सर्व्वलक्षणसम्पन्ना[२] लक्ष्मीरिव गुणाधिका ॥ ३ ॥

तस्यां ये तु गुणा ह्यासंस्ते तिष्ठन्ति जगत्त्रये[३] ।

धर्म्मो धर्म्मव्रतायास्तु त्रिषु लोकेषु मार्गयन् ॥ ४ ॥

नानुरूपं वरं लेभे धर्म्मोऽथ वरसिद्धये ।

तपः कुरु वरार्थं त्वं[४] तथेत्युक्त्वा वनं ययौ ॥ ५ ॥

कन्या सा च तपस्तेपे सर्व्वेषां दुष्करञ्च यत्[५] ।

वायुभक्षा श्वेतकल्पे युगानामयुतं[६] पुरा ॥ ६ ॥

---

(१) सनत्कुमार उवाच। इत्यनन्तरं मुद्रितपुस्तके, शृणु नारद वक्ष्यामि कथयामि पुरातनमिति पाठो वर्त्तते।

(२) सर्व्वलक्षणसम्पूर्णा इति मुद्रितपु०।

(३) तस्यां ये तु गुणा ह्यासंस्ते तिष्ठन्ति जगत्त्रये। इति पाठो मुद्रितपुस्तके न दृश्यते।

(४) वरारोहे इति मुद्रितपु०।

(५) दुष्करं यत्तपस्विनामिति मुद्रितपु०।

(६) शरदामयुतमिति मुद्रितपु०।

ब्रह्मणो मानसः पुत्रो मरीचिर्नाम विश्रुतः ।
[1]पर्य्यटन् पृथिवीं सर्व्वां कन्यारत्नं ददर्श सः[2] ॥ ७ ॥
रूपयौवनसम्पन्नां परमे तपसि स्थितां ।
पप्रच्छाथ मरीचिस्तां का त्वं कस्यासि तद्वद ॥ ८ ॥
रूपेणानेन मां भीरु[3] विमोहयसि सुव्रते ।
ब्रह्मात्मजोऽहं विख्यातो मरीचिर्व्वेदपारगः ॥ ९ ॥
मरीचेर्व्वचनं श्रुत्वा कन्या प्रोवाच तं मुनिं[4] ।
अहं धर्म्मव्रता नाम धर्म्मपुत्री तपोऽन्विता ॥ १० ॥
पतिंव्रतार्थं विप्रेन्द्र चरामि परमं तपः ।
धर्म्मव्रतां मरीचिस्तामुवाच प्रीतिपूर्व्वकं ॥ ११ ॥
पतिव्रता दर्शनान्मे भविष्यसि शुभव्रते ।
पतिव्रतेच्छया पृथ्वीं विचरामि ह्यहर्न्निशं ॥ १२ ॥
त्वञ्चेत्[5] पतिव्रता जाता भजे त्वां भज मां[6] वरं ।
लोके न त्वादृशी कन्या मम तुल्यो न ते वरः ॥ १३ ॥
धर्म्मव्रते धर्म्मपत्नी तस्मात्त्वं[7] भव मेऽधुना ।

---

(१) पर्य्यटन्नितिश्लोकार्द्धात्प्राक् मुद्रितपुस्तके,
प्रवृत्तिलक्षणं धर्म्मं कर्त्तुं स ब्रह्मणेरितः । इति पाठोऽस्ति ।
(२) ह इति मुद्रितपु० ।
(३) नूनमिति मुद्रितपु० ।
(४) प्रोवाचेदं शुचिस्मिता इति मुद्रितपु० ।
(५) त्वञ्चेति ख० ग० ।
(६) भजन्त्वां भज मामिति मुद्रितपु० ।
(७) धर्म्मपुत्रि तस्मात्त्वं भज इति ख० ग० ।

धर्म्मव्रता मुनिं प्राह धर्म्मं याचय सुव्रत ॥१४॥
तच्छ्रुत्वा धर्म्ममगमन्मुनिं धर्म्मो ददर्श च ।
तेजःपुञ्जं वरं मत्वा आसनार्घ्यादिना[1] ऽर्चयत् ॥१५॥
किमर्थमागतः पृष्टो मरीचिर्धर्म्ममब्रवीत् ।
कन्यार्थी भ्रमता पृथ्वीं दृष्टा ते कन्यका वरा ।
मह्यं कन्यामिमां देहि[2] श्रेयस्तव भविष्यति ॥१६॥
अर्घ्यादिना समभ्यर्च्य[3] धर्म्मः प्रोचे तथेति तं ।
धर्म्मव्रतां समानीय दत्तवांस्तां मरीचये ॥१७॥
वरं च दत्तवांस्तस्मै[4] तद्वाक्यं यत् तथा कृतं[5] ।
अग्निहोत्रेण सहितां स्वाश्रमं तां द्विजोऽनयत् ॥१८॥
रेमे मुनिस्तया सार्द्धं यथा विष्णुः श्रिया सह ।
पार्व्वत्या च यथा शम्भुः सरस्वत्या यथा ह्यजः ॥१९॥
यज्ञे पुत्रशतं तस्यां मरीचेर्विष्णुनोपमं[6] ।
मरीचिः फलपुष्पार्थं वनं गत्वा समागतः ॥२०॥
श्रान्तः कदाचित्तां पत्नीमुवाचेति[7] पतिव्रतां ।
भुक्त्वा तु शयनस्थस्य पादसंवाहनं कुरु ॥२१॥
धर्म्मव्रता तथेत्युक्त्वा शयनस्थस्य सा मुनेः ।

(१) अर्घ्यपाद्यादिनेति मुद्रितपु० ।
(२) वराय सा देया इति मुद्रितपु० ।
(३) अर्घ्यपाद्यादिनाभ्यर्च्य इति मुद्रितपु० ।
(४) तस्मै इति पाठो युक्तः ।
(५) तद्वाक्यञ्च तथाकरोदिति ख० ग० ।
(६) विबुधोपममिति मुद्रितपु० ।
(७) श्रान्तश्चाथ कदाचित्तामुवाचातिपतिव्रतामिति मुद्रितपु० ।

पादसंवाहनं चक्रे घृतेनाभ्यज्य तत्परा ॥ २२ ॥
निद्रायमाणेऽथ मुनौ ब्रह्मा तं देशमागतः।
इत्येष[१] दृष्ट्वा ब्रह्माणं मनसार्चयितुं प्रभुं[२] ॥२३॥
पादसंवाहनं कुर्य्यां किं पूज्योऽयं जगद्गुरुः।
इत्याकुला समुत्तस्थौ मत्वा सा तं[३] गुरोर्गुरं ॥ २४ ॥
अर्घ्यपाद्यादिकं दत्वा ब्रह्माणं समपूजयत्।
सत्कृतायान्तु शय्यायां विश्राममकरोदजः ॥ २५ ॥
एतस्मिन्नन्तरे भर्त्ता समुत्तस्थौ च तत्पतः[४]।
धर्म्मव्रतामपश्यन् स विप्रः क्रुद्धः शशाप तां ॥२६॥
पादसंवाहनं त्यक्ता यस्मादाज्ञां विहाय मे।
गतान्यत्र ततः पापाच्छापदग्धा[५] शिला भव ॥२७॥
भर्त्रा धर्म्मव्रता शप्ता मरीचिं प्राह सा रुषा[६]।
शयाने त्वयि संप्राप्ते ब्रह्मा त्वज्जनको गुरुः ॥ २८ ॥
तयोत्थाय हि कर्त्तव्यं स्वगुरोः पूजनं सदा।
मया तु धर्म्मचारिण्या[७] तव कार्य्ये कृते मुने ॥२९॥
अदोषाहं[८] यतः शप्ता तस्माच्छापं ददामि ते।

(१) इयेष इति पाठः सङ्गतः।
(२) इत्येष इति श्लोकार्द्धं मुद्रितपुस्तके नास्ति।
(३) च इति ख० ग०।
(४) स्वतल्पतः इति मुद्रितपु०।
(५) पापे शापो दत्तः इति मुद्रितपु०।
(६) कोपिता इति मुद्रित पु०।
(७) तदज्ञानात्त्वया शप्ता इति मुद्रित पु०।
(८) अदोषापीति मुद्रित पु०।

तस्य शापं महादेवाद्भर्त्तुः प्राप्यस्य संशयं ॥ ३० ॥
व्याकुलं तं पतिं दृष्ट्वा व्याकुलागात् प्रजापतिं[१] ।
नत्वा शयानं ब्रह्माणमग्निं प्रज्वाल्य चेन्धनैः ॥ ३१ ॥
गार्हपत्ये स्थिता चक्रे तपः परमदुष्करं[२] ।
तथा शप्तो[३] मरीचिश्च तपस्तेपे सुदारुणं ॥ ३२ ॥
पतिव्रतायास्तपसा मरीचेस्तपसा तथा ।
[४]इन्द्रादयश्च सन्तप्ता गतास्ते शरणं हरिं ॥ ३३ ॥
ऊचुः क्षीराम्बुधौ सुप्तं सन्तप्तास्तपसा हरे ।
पतिव्रतायाश्च मुने[५] स्त्रैलोक्यं रक्ष केशव ॥ ३४ ॥
इन्द्रादीनां वचः श्रुत्वा विष्णुर्धर्म्मव्रतां ययौ ।
एतस्मिन्नेव काले तु प्रबुद्धो भगवानजः ।
ऊचुर्धर्म्मव्रतां देवा अग्निस्थां तां सकेशवाः[६] ॥ ३५ ॥
अग्निमध्ये तपः कर्त्तुं कस्य[७] शक्तिः पतिव्रते ।

---

(१) व्याकुलं तं पतिं दृष्ट्वा इत्यस्मिन् श्लोकस्थले मुद्रितपुस्तके,
तं व्याकुलं पतिं दृष्ट्वा व्याकुला सा पतिव्रता ।
पतिव्रतात्वमाहात्म्यात् पत्युः शपं दधार सा ॥ २८ ॥
नत्वा शयानमित्यादि पाठो वर्त्तते ॥
(२) दुश्चरमिति मुद्रितपु० ।
(३) पत्न्या शप्तो इति मुद्रितपु० ।
(४) इन्द्रादयश्च सन्तप्ता इति श्लोकार्द्धात्प्राक् मुद्रितपुस्तके,
सन्तापितं जगत्सर्व्वं सदेवासुरमानसं ॥ ३० ॥ इति पाठो वर्त्तते ।
(५) स्तपस इति मुद्रितपु० ।
(६) सह केशवाः इति ख० ग० ।
(७) कस्याः इति ख० ग० ।

त्वया कृतं तत्परमं सर्व्वलोकभयङ्करं ॥ ३६ ॥
वरं वरय धर्म्मज्ञे अस्मत्तो यदभीप्सितं ।
विष्ण्वादीनां वचः श्रुत्वा देवान् धर्म्मव्रताब्रवीत् ॥ ३७ ॥
भर्त्रे[1] शापमशक्ताश्चं निवर्त्तयतुमोजसा ।
दत्तो मरीचिना शापो मह्यं स ह्यपगच्छतु[2] ॥ ३८ ॥
धर्म्मव्रतावचः श्रुत्वा प्रोचुरेतां सुराः पुनः[3] ।
धर्म्मव्रते धर्म्मपुत्रि शापोऽयं परमर्षिणा ॥ ३९ ॥
दत्तस्ते न निराकर्त्तुं शक्यो देवद्विजातिभिः ।
तस्मादन्यं वरं ब्रूहि यतो धर्म्मस्य संस्थितिः ॥ ४० ॥
भवेद्दै त्रिषु लोकेषु वेदोक्तस्य शुभव्रते[4] ।
देवानां वचनं[5] श्रुत्वा देवान् धर्म्मव्रताब्रवीत् ॥ ४१ ॥
भर्त्तुः शापान्मोचयितुं न शक्ताश्च यदामराः[6] ।
मह्यं वरं प्रयच्छध्वं एवंविधमनुत्तमं ॥ ४२ ॥
शिलाहं हि भविष्यामि[7] ब्रह्माण्डे पावनी शुभा ।
नदीनदसरस्तीर्थं[8] देवादिभ्योऽतिपावनी ॥ ४३ ॥
ब्रह्मादिभ्यो मुनिभ्यश्च मुख्यदेवेभ्य एव च ।

(१) भर्त्तुरिति मुद्रित पु० ।
(२) व्यपगच्छतु इति मुद्रित पु० ।
(३) देवाः प्रोचुः पतिव्रतामिति मुद्रित पु० ।
(४) एतच्छ्लोकार्द्धं मुद्रितपुस्तके नावलोक्यते ।
(५) विष्ण्वादीनां वच इति मुद्रित पु० ।
(६) भर्त्तुः शापाद्विमोक्तुं मां न शक्नुथ यतोऽथवा । इति मुद्रित पु० ।
(७) प्रभविष्यामीति मुद्रित पु० ।
(८) नदीनदादितीर्थेभ्यो इति मुद्रित पु० ।

त्रैलोक्ये यानि लिङ्गानि व्यक्ताव्यक्तात्मकान्यपि ॥
तानि तिष्ठन्तु मद्देहे तीर्थरूपेण सर्व्वदा ॥ ४४ ॥
तीर्थान्यपि च सर्व्वाणि नद्यश्च प्रमुखास्तथा ।
तिष्ठन्तु देवाः सकलाः देव्यश्च मुनयस्तथा[1] ॥ ४५ ॥
[2]शिलास्थितेषु तीर्थेषु स्नात्वा कृत्वाथ तर्पणं ।
श्राद्धं सपिण्डकं येषां ब्रह्मलोकं प्रयान्तु ते ॥ ४६ ॥
गदाधरो दृश्यतीर्थे सर्व्वतीर्थोत्तमोत्तमं[3] ।
[4]मुक्तिर्भवेत् पितॄणां च[5] बहूनां श्राद्धतः सदा ॥४७॥

---

(१) ऋष्यादिभ्यो मुनिभ्यश्च इत्यादि देव्यश्च मुनयस्तथा इत्यन्तपाठो मुद्रितपुस्तके न दृश्यते ।

(२) शिलास्थितेषु तीर्थेषु इति श्लोकार्द्धात्प्राक् मुद्रितपुस्तके,

ब्रह्मा विष्णुश्च रुद्रश्च अध्यासित्वा पदं स्थि ।
पञ्चाग्नयः कुमाराद्या वसुरूपेण संस्थिताः । ४२ ।
मूर्त्तामूर्त्तस्वरूपेण पदरूपेण देवताः ।
शिलायां प्रोक्षमाणेन मूर्त्तिरूपाः स्थिता भुवि । ४३ ।
तां दृष्ट्वा सर्व्वलोकश्च महापातकनाशिनीं ।
पूतो धर्म्माधिकारी च श्राद्धकृद्ब्रह्मलोकभाक् । ४४ ।

एते त्रयः श्लोकाः सन्ति ।

(३) एतच्छ्लोकार्द्धं मुद्रितपुस्तके नेक्ष्यते ।

(४) मुक्तिर्भवेदितिश्लोकार्द्धात्प्राक् मुद्रितपुस्तके,

स्नास्यन्ति च मरिष्यन्ति यान्तु ब्रह्मपुरीं नराः ।
वाराणसी प्रयागश्च पुरुषोत्तमसंज्ञकं । ४६ ।
गङ्गासागरसंज्ञश्च नित्यं तिष्ठतु मत्पुनि ।
गदाधराधिष्ठितं तत् सर्व्वतीर्थोत्तमोत्तमं । ४७ ।

इमौ द्वौ श्लोकौ स्तः ।

(५) सुतानामिति मुद्रित पु० ।

जरायुजाण्डजा वापि स्वेदजा वापि चोद्भिदः ॥
त्यक्त्वा देहं शिलायान्ते यान्तु विष्णुस्वरूपतां[१] ॥ ४८ ॥
यथार्च्चिते हरौ सर्व्वे यज्ञाः पूर्णा भवन्ति हि ।
तथा श्राद्धं तर्पणञ्च स्नानञ्चाचयमस्त्विह ॥ ४९ ॥
मम देहे सुरेशानां ये जपन्ति श्रुतादिकं ।
अचिरेणापि ते सिद्धाः सिद्धिभाजो भवन्तु वै ॥ ५० ॥
पितॄणां कुलमाहत्समात्मना सहितं नरः ।
श्राद्धादिना समुद्धृत्य विष्णुलोकं नयेद्ध्रुवं ॥५१॥
यावत्योऽपि सरित्श्रेष्ठा गङ्गाद्याश्च ह्रदाः शुभाः ।
समुद्राद्याः सरोमुख्या मानसाद्याः सुरेश्वराः ।
नृणां श्राद्धं विदधतो मुक्तये निवसन्तु मे ॥ ५२ ॥
शरीरेण समायान्तु कश्चिन्नो यान्तु देवताः ।
एको विष्णुस्त्रिधामूर्त्तिर्यावत्सङ्कीर्त्यते बुधैः ॥ ५३॥
तावच्छिलायां सर्व्वाणि तीर्थानि सह दैवतैः ।
सदा तिष्ठन्तु मुनयो गन्धर्व्वाणाङ्गणाश्च ये[२] ॥ ५४ ॥
[३]यावत्तिष्ठति ब्रह्माण्डं तावत्तिष्ठतु वै शिला ।

---

(१) जरायुजाण्डजा वापीतिपद्यस्थले मुद्रितपुस्तके,
जरायुजाण्डजा वापि देहं त्यक्त्वा शिलोपरि ।
गच्छन्तु विष्णुसायुज्यं कुलैः सप्तशतैः सह ॥ ८॥ इति पाठो ऽस्ति ।
(२) यथार्च्चिते हरौ सर्व्वे इत्यादि गन्धर्व्वाणां गणाश्च ये इत्यन्तपाठो मुद्रितपुस्तके न समीक्ष्यते ।
(३) यावत्तिष्ठति इत्यस्मात्प्राक् मुद्रितपुस्तके, सर्व्वदेवस्वरूपा च नाम्नेयं देवरूपिणी । इति श्लोकार्द्धं वर्त्तते ।

मम देहेऽश्मरूपे च ये जपन्ति तपन्ति च ॥ ५५ ॥
जुहोत्यग्नौ च तेषां वै तदक्ष्योपतिष्ठतां।
अक्षयन्तु भवेच्छ्राद्धं जपहोमतपांसि च ।
शिलापर्व्वतरूपेण मयि तिष्ठत सर्व्वदा ॥ ५६ ॥
पतिव्रतावचः(१) श्रुत्वा देवाः प्रोचुः पतिव्रतां ।
त्वया यत् प्रार्थितं सर्व्वं तद्भविष्यत्यसंशयं ॥ ५७ ॥
गयासुरस्य शिरसि भविष्यसि यदा स्थिरा ।
तदा पादादिरूपेण स्थास्यामस्त्वयि सुस्थिराः ।
वरं शिलायै दत्त्वैवं तत्रैवान्तर्दधुः सुराः ॥ ५८ ॥

इति श्रीमहापुराणे वायुप्रोक्ते(२) गयामाहात्म्यं नाम
पञ्चचत्वारिंशोऽध्यायः ।

---

(१) पतिव्रतावचः इत्यत्र ख० ग० पुस्तकयोर्देवरूपावचः इतिपाठः समीक्ष्यते ।
(२) श्वेतवराहकल्पे इति मुद्रित पु० ।

षट्चत्वारिंशोऽध्यायः ।

गयामाहात्म्यं ।

सनत्कुमार उवाच । वक्ष्ये शिलाया माहात्म्यं शृणु नारद मुक्तिदं ।
यस्या गायन्ति देवाश्च माहात्म्यं मुनिपुङ्गवाः[१] ॥ १ ॥
शिला स्थिता पृथिव्यां सा देवरूपातिपावनी ।
विचित्राख्यं शिलातीर्थं[२] त्रिषु लोकेषु विश्रुतं ॥ २ ॥
तस्याः संस्पर्शनाल्लोकाः सर्वे हरिपुरं ययुः ।
शून्ये लोकत्रये जाते शून्या यमपुरी ह्यभूत्[३] ॥ ३ ॥
यम इन्द्रादिभिर्गत्वा ऊचे ब्रह्माणमद्भुतं[४] ।
[५]अधिकारं गृहाणाय[६] यमदण्डं पितामह ॥ ४ ॥
यममूचे ततो ब्रह्मा स्वगृहे धारयस्व तां ।
ब्रह्मोक्तो धर्मराजस्तु गृहे तां समधारयत् ॥ ५ ॥
यमोऽधिकारं स्वं चक्रे पापिनां[७] शासनादिकं ।

---

(१) एतच्छ्लोकार्द्धं मुद्रितपुस्तके न दृश्यते ।
(२) चित्रं शिलाख्यं तत्तीर्थमिति मुद्रित पु० ।
(३) शून्ये यमपुरे जाते यमो ब्रह्मायमागतः । इति मुद्रित पु० ।
(४) एतच्छ्लोकार्द्धं मुदितपुस्तके नास्ति ।
(५) अधिकारं गृहाणाय इतः प्राक् मुद्रितपुस्तके,
ऊचे शिलास्पर्शनान्मे ब्रह्मन् शून्या पुरी ह्यभूत् ॥ ३ ॥
इति पाठो वर्त्तते ।
(६) गृहाण त्वमिति मुद्रित पु० ।
(७) प्राणिनामिति मुद्रित पु० ।

एवंविधा गुरुतरा शिला जगति विश्रुता ॥ ६ ॥
यथा ब्रह्मा यथा विष्णुर्यथा देवो महेश्वरः ।
ब्रह्माण्डे च(१) यथा मेरुस्तथेयं देवरूपिणी ॥ ७ ॥
गयासुरस्य शिरसि गुरुत्वाद्धारिता यतः(२) ।
अतः पवित्रयोर्योगः(३) पितॄणां मोक्षदायकः ॥ ८ ॥
पवित्रयोर्द्वयोर्योगे ह्यमेधमखोऽकरोत् ।
भागार्थं(४) मागतान् दृष्ट्वा विष्ण्वादीनब्रवीच्छिला ॥ ९ ॥
शिलास्थितिप्रतिज्ञां तु कुर्वन्तु पितृमुक्तये ।
तथेत्युक्त्वा शिलायान्ते देवा विष्ण्वादयः स्थिताः ॥ १० ॥
शिलारूपेण मूर्त्या च(५) पदरूपेण देवताः ।
मूर्त्तामूर्त्तस्वरूपेण(६) स्थिताः पूर्वप्रतिज्ञया(७) ॥ ११ ॥
दैत्यस्य मुण्डपृष्ठे तु यस्मात् सा संस्थिता शिला(८) ।
तस्मात् स मुण्डपृष्ठाद्रिः पितॄणां ब्रह्मलोकदः ॥ १२ ॥
आच्छादितः शिलापादः(९) प्रभासेनाद्रिणा यतः(१०) ।

---

(१) ब्रह्माण्डश्चेति मुद्रित पु० ।
(२) तथा इति मुद्रित पु० ।
(३) पवित्रयोर्द्वयोर्योगः इति मुद्रित पु० ।
(४) भागार्थमिति मुद्रित पु० ।
(५) मूर्त्तश्चेति ख० ग० ।
(६) व्यक्ताव्यक्तस्वरूपेणेति मुद्रित पु० ।
(७) सर्व्वाः प्रतिज्ञयेति मुद्रित पु० ।
(८) शिला यस्माच्च संस्थिता इति मुद्रित पु० ।
(९) आच्छादितं शिलारूपमिति मुद्रित पु० ।
(१०) ततः इति मुद्रित पु० ।

भासितो भास्करेणेति[१] प्रभासः परिकल्पितः[२] ॥ १३ ॥
प्रभासं हि विनिर्भिद्य[३] शिलाङ्गुष्ठो विनिर्गतः।
अङ्गुष्ठोत्थित ईशोऽपि[४] प्रभासेशः प्रकीर्त्तितः ॥ १४ ॥
शिलाङ्गुष्ठैकदेशो यः सा च प्रेतशिला स्मृता।
पिण्डदानाद्यतस्तस्यां[५] प्रेतत्वान्मुच्यते नरः ॥ १५ ॥
महानदीप्रभासाख्योः सङ्गमे स्नानकृन्नरः।
रामो देव्या सह स्नातो रामतीर्थं ततः स्मृतं ॥ १६ ॥
प्रार्थितोऽथ[६] महानद्या राम स्नातो भवेति च।
रामतीर्थं ततो भूत्वा त्रिषु लोकेषु विश्रुतं[७] ॥ १७ ॥
जन्मान्तरशतं साग्रं यत् कृतं दुष्कृतं मया।
तत् सर्वं विलयं यातु रामतीर्थाभिषेचनात् ॥ १८ ॥
मन्त्रेणानेन यः स्नात्वा श्राद्धं कुर्वीत मानवः।
रामतीर्थे पिण्डदस्तु विष्णुलोकं प्रयात्यसौ[८]।
तथेत्युक्त्वा स्थितो रामः सीतया भरताग्रजः ॥ १९ ॥
राम राम महाबाहो देवानामभयङ्कर।
त्वां नमस्येऽथ[९] देवेशं मम नश्यतु पातकं ॥ २० ॥

---

(१) भास्करेणासौ इति मुद्रित पु०।
(२) परिकीर्त्तितः इति मुद्रित पु०।
(३) प्रभासाद्रिं तु निर्भिद्य इति मुद्रित पु०।
(४) तस्मात् ह्येवेश्वरो जात इति मुद्रित पु०।
(५) पिण्डप्रदानात्तस्यां तु इति मुद्रित पु०।
(६) ऽप्य इति ख० ग०।
(७) पावनमिति मुद्रित पु०।
(८) प्रयात्यसौ इति पाठः सुसङ्गतः।
(९) नमस्येऽहं इति ख० ग०।

मन्त्रेणानेन यः स्नात्वा श्राद्धं कुर्य्यात् सपिण्डकं[1] ।
प्रेतत्वात्तस्य पितरो विमुक्ताः पितृतां ययुः[2] ॥ २१ ॥
त्वापस्त्वमसि देवेश ज्योतिषां पतिरेव च ।
पापं नाशय मे देवो मनोवाक्कायकर्मजं ॥ २२ ॥
नमस्कृत्य प्रभासेशं भासमानं शिवं व्रजेत् ।
तस्य शम्भुं नमस्कृत्य कुर्य्याद्यमबलिं ततः[3] ॥ २३ ॥
रामे वनं गते शैलमागत्य भरतः स्थितः ।
पितृपिण्डादिकं कृत्वा रामं संस्थाप्य तत्र च ॥ २४ ॥
रामं सीतां लक्ष्मणञ्च मुनीन् स्थापितवान् प्रभुः ।
भरतस्याश्रमे पुण्ये नित्यं पुण्यतमैर्वृतं ।
मतङ्गस्य पदं तत्र दृश्यते सर्वमानुषैः ॥ २५ ॥
स्थापितं धर्म्मसर्वस्वं लोकस्यास्य निदर्शनात् ।
मतङ्गस्य पदे श्राद्धी सर्वांस्तारयते पितॄन् ॥ २६ ॥
रामतीर्थे नरः स्नात्वा रामं सीतां समर्च्च्य च ।
रामेश्वरं प्रणम्याथ न देही जायते पुनः[4] ॥ २७ ॥
शिलाया जघनं भूयः समाक्रान्तं नगेन तु ।

---

(१) रामतीर्थे नरः स्नात्वा मन्त्रैः पिण्डप्रदो भवेदिति मुद्रित पु० ।
(२) राम राम महाबाहो इत्यस्माच्छ्लोकात्प्राक् मुद्रितपुस्तके,
रामतीर्थे नरः स्नात्वा इति श्लोको वर्त्तते ।
(३) राम राम महाबाहो इत्यस्माच्छ्लोकात्परतः मुद्रितपुस्तके, त्वां नमस्येऽथ देवेशमिति श्लोकार्द्धं, नमस्कृत्य प्रभासेशमिति श्लोकश्च, वर्त्तते ।
(४) रामं वनं गते शैलमित्यादि न देही जायते पुनः इत्यन्तपाठो मुद्रितपुस्तके न दृश्यते ।

धर्मराजेन संतोक्तो न गच्छेति नगः स्मृतः ॥ २८ ॥
यमराजधर्मराजौ निश्चलार्थं व्यवस्थितौ।
ताभ्यां बलिं प्रयच्छामि[1] पितृणां मुक्तिहेतवे[2] ॥२८॥
द्वौ श्वानौ[3] श्यामशबलौ वैवस्वतकुलोद्भवौ।
ताभ्यां बलिं प्रयच्छामि स्यातामेतावहिंसकौ ॥ ३० ॥
ऐन्द्रवारुणवायव्ययाम्यनैर्ऋत्यसंस्थिताः।
वायसाः प्रतिगृह्णन्तु भूमौ[4] पिण्डं मया स्थितं[5] ॥३१॥
[6]शिलाया दक्षिणे हस्ते स्थापितः कुण्डपर्वतः[7]।

---

(१) प्रदास्यामीति मुद्रित पु०।
(२) स्यातावेतावहिंसकाविति मुद्रित पु०।
(३) देवौ इति मुद्रित पु०
(४) अत्र भूमौ इति पाठः सम्भाव्यते।
(५) एष श्लोको मुद्रितपुस्तके नेष्यते।
(६) शिलाया दक्षिणे हस्ते इत्यस्मात्श्लोकात्प्राक् मुद्रितपुस्तके,

यमोऽसि यमदूतोऽसि वायसोऽसि महाबल।
सप्तजन्मकृतं पापं बलिं भुक्त्वा विनाशय ॥ २५ ॥
रामे वनं गते प्रेष्यमागत्य भरतेन हि।
पितुः पिण्डादिकं कृत्वा रामेशः स्थापितोऽत्र वै ॥ २६ ॥
स्नात्वा नत्वा च रामेशं रामसीतासमन्वितं।
तत्र श्राद्धं सपिण्डञ्च कृत्वा विष्णुपुरं व्रजेत्।
पितृभिः सह धर्म्मात्मा कुलानाञ्च शतैः सह ॥ २७ ॥

एते चयः श्लोकाः ख० ग० पुस्तकयोर्न सन्ति।

(७) शिलाया दक्षिणे हस्ते इतः श्लोकार्द्धात्परतः मुद्रितपुस्तके, तत्र श्राद्धादिना सर्व्वान् पितॄन् ब्रह्मपुरं नयेत् ॥ २८ ॥ इति श्लोकार्द्धं वर्त्तते।

तिमिरादित्य ईशानभर्गावेते महेश्वराः ॥ ३२ ॥
वह्निर्दो वरुणौ रुद्राश्चत्वारः पितृमोक्षदाः ।
भरताश्रममासाद्य तान्नमेत् पूजयेन्नरः ॥ ३३ ॥
पापेभ्यश्चोपपापेभ्यो मुच्यते पितृभिः सह ।
यत्र कुत्रापि देवर्षे भरतस्याश्रमे नरः ।
स्नातः श्राद्धादिकं कुर्य्यात्तत्कल्पोऽपि न क्षीयते ॥ ३४ ॥
गयायां चाक्षयं श्राद्धं जपहोमतपांसि च ।
सर्वमानन्त्यमाप्नोति यद्दत्तं भरताश्रमे ॥ ३५ ॥
चतुर्युगस्वरूपेण चतस्रो रविमूर्त्तयः ।
दृष्टाः स्पृष्टाः पूजितास्ताः पितॄणां मुक्तिदायकाः ॥ ३६ ॥
मुक्तिर्वामन इत्येव तारकाख्यो विधिः परः ।
संसारार्णवमग्नानां नावावेतौ सुरेश्वरौ ।
तारकं ब्रह्म विश्वेषां भूतानां जीवतामिदं ॥ ३७ ॥
त्रिविक्रमस्य ब्रह्माणं यः पश्येत्पुरुषोत्तमं ।
पितृभिः सह धर्मात्मा स याति परमां गतिं ॥ ३८ ॥
शिलाया वामपादेऽपि तथाभ्युद्यन्तको गिरिः ।
स्थापितः पिण्डदस्तत्र पितॄन् ब्रह्मपुरं नयेत् ॥ ३९ ॥
नैमिषारण्यपार्श्वे तु ईशे ब्रह्मा सुरैः सह ।
मुख्यसंज्ञं हि तत्तीर्थं देवास्तत्र पदे स्थिताः ॥ ४० ॥
त्रिषु तेषु च पदेष्वेव तीर्थेषु मुनिसत्तम ।
यत् किञ्चिदशुभं कर्म तत् प्रणश्यति नारद ॥ ४१ ॥
तन्नैमिषवनं पुण्यं सेवितं पुण्यपौरुषैः ।

तत्र व्यासः शुकः पैलः कण्वो वेधाः शिवो हरिः ॥ ४२ ॥
तेषां दर्शनमात्रेण मुच्यते पातकैर्नरः[१]।
वामहस्ते शिलायास्तु तथा चोद्यन्तको[२] गिरिः ॥ ४३ ॥
स पर्वतः समानीतो ह्यगस्त्येन[३] महात्मना[४]।

---

(१) तिमिरादित्य ईशान इत्यादि मुच्यते पातकैर्नरः इत्यन्तपाठो मुद्रितपुस्तके न दृश्यते।

(२) चुद्यन्तको इति ख० ग०।

(३) आनीतो ह्युदयाद्रेस्तु सोऽगस्त्येनेति मुद्रित पु०।

(४) वामहस्ते शिलायास्तु इति श्लोकात्परत अध्यायसमाप्तिं यावत् ख० ग० पुस्तकस्थितपाठे मुद्रितपुस्तकस्थपाठादत्यन्तप्रभेदो दृश्यते। ख० ग० पुस्तकस्थितपाठो मूले वर्त्तते।

मुद्रितपुस्तकस्थतत्पाठो यथा।

स्थापितः पिण्डदस्तत्र पितॄन् ब्रह्मपुरं नयेत् ॥ २९ ॥
कुण्डश्चोद्यन्तकस्तत्र आत्मनस्तपसा ह्रतः।
ब्रह्मणा तत्र सावित्रीकुमाराभ्यां सह स्थितं ॥ ३० ॥
हाहाहूहूप्रमुखतयो गीतिनादं प्रचक्रिरे।
कुण्डमुद्यन्तकं तत्र गीतवादित्रको गिरिः ॥ ३१ ॥
आगस्त्यो भगवान् यत्र तपश्चोग्रं चकार ह।
ब्रह्मणस्तु वरं लेभे माहात्म्यं भुवि दुर्लभं।
लोपामुद्रां तथा भार्य्यां पितॄणां परमां गतिं ॥ ३२ ॥
स्नातस्तत्र च मध्याह्ने सावित्रीं समुपास्य च।
कोटिजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥ ३३ ॥
अगस्त्यस्य पदे स्नात्वा पिण्डदो ब्रह्मलोकगः।
पितृभिः सह धर्म्मात्मा पूज्यमानो दिवौकसां ॥ ३४ ॥

तत्र ब्रह्मा हरश्चैव तपश्चोग्रञ्च चक्रतुः ॥४४॥
तत्रागस्त्यस्य हि वरं कुण्डं त्रैलोक्यदुर्लभं ।
यत्र मुन्यष्टकं सिद्धं तपस्तप्त्वा शिवं गतं ।
कुण्डे मुन्यष्टकं नत्वा पितॄन् ब्रह्मपुरं नयेत् ॥४५॥

ब्रह्मयोनिं प्रविश्याथ निर्गच्छेद्यस्तु मानवः ।
परं ब्रह्म स यातीह विमुक्तो योनिसङ्कटात् ॥ २५ ॥
नत्वा गयाकुमारञ्च ब्राह्मण्यं लभते नरः ।
सोमकुण्डाभिषेकी च सोमलोकं नयेत् पितॄन् ॥ २६ ॥
बलिः काकशिलायान्तु काकेभ्यश्च यमोक्षदः ।
स्वर्गद्वारेश्वरं नत्वा स्वर्गाद्ब्रह्मपुरं व्रजेत् ॥ २७ ॥
पिण्डदो व्योमगङ्गायां निर्म्मलः स्वर्नयेत् पितॄन् ।
शिलाया दक्षिणे हस्ते भस्मकूटमधारयत् ।
ततोऽसौ भस्मकूटाद्रिर्भस्मस्नातश्च नारद ॥ २८ ॥
वटो वटेश्वरस्तत्र स्थितश्च प्रपितामहः ।
भस्मकूटस्य पदे पुण्ये पिण्डदः स्वर्नयेत्पितॄन् ॥ २९ ॥
तस्याग्रे रुक्मिणीकुण्डं पश्चिमे कपिला नदी ।
कपिलेशो नदीतीरे ह्यमासोमसमागमे ॥ ३० ॥
कपिलायां नरः स्नात्वा कपिलेशं नमेच्च यः ।
श्राद्धदः स्वर्गगामी स्यात् माहेश्वरीकुण्ड एव च ॥ ३१ ॥
गौरी च मङ्गला तत्र सर्व्वसौभाग्यदायिनी ।
जनार्द्दनो भस्मकूटे तस्य हस्ते च पिण्डदः ॥ ३२ ॥
मन्त्रेण चात्मनोऽन्येषां सव्यहस्ते तिलैर्विना ।
जीवतां दधिसंमिश्रं सर्व्वे ते विष्णुलोकगाः ॥ ३३ ॥
एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ।

अगस्त्येनाथ देवर्षे उदयाद्रेर्महात्मना ।
शिलाया वामहस्तेऽपि स्थापितो गिरिराट् शुभः ।
वादित्राद्यैर्दिव्यगीतैराढ्यो वादित्रको गिरिः ॥४६॥

देहि देव गयाशीर्षे तस्मै तस्मिन् मृते तु त्वं ॥ ४४ ॥
एष पिण्डो मया दत्तस्तव हस्ते जनार्दन ।
गयाशीर्षे त्वया देयो मह्यं पिण्डो मृते मयि ॥ ४५ ॥
जनार्दन नमस्तुभ्यं नमस्ते पितृरूपिणे ।
पितृपते नमस्तुभ्यं नमस्ते मुक्तिहेतवे ॥ ४६ ॥
गयायां पितृरूपेण स्वयमेव जनार्दन ।
लक्ष्मीकान्त नमस्तेऽस्तु नमस्ते पितृमोक्षद ॥ ४७ ॥
तं ध्यात्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ।
पुण्डरीकाक्षमभ्यर्च्य स्वर्गं प्रापुर्नरा ध्रुवं ॥ ४८ ॥
वामजानु तु संपात्य गत्वा भीमो जनार्दनं ।
श्राद्धं सपिण्डकं कृत्वा भ्रातृभिर्विपुलोत्कमः ॥ ४९ ॥
शिलाया दक्षिणे पादे प्रेतकूटो गिरिः स्थितः ।
धर्मराजेन पादाभ्यां गिरिः प्रेतशिलाश्रयः ॥ ५० ॥
पादेन दूरे निक्षिप्तः शिलायाः पापभारतः ।
प्रेतभावस्वरूपेण करणाद्वयवानने ॥ ५१ ॥
पृष्ठे स्थिताश्च वहवो विघ्नकारिण एव ते ।
श्राद्धादिकरणान्नृणां तीर्थं पितृविमुक्तिदं ॥ ५२ ॥
अतः शिलाङ्गसंस्पर्शात्प्रेतकूटः पवित्रतां ।
प्रेतकूटस्य तत्रास्ते देवास्तत्र पदे स्थिताः ।
तत्र श्राद्धादिकं कृत्वा प्रेतत्वान्मोचयेत् पितॄन् ॥ ५३ ॥
शिलासमीपे ये विप्र प्रेतरूपा भयानकाः ।

तत्र विद्याधरो नाम गन्धर्वाप्सरसाङ्गणैः ।
समेतोऽद्यापि गीतानि दिव्यानि यत्र गीयते[1] ॥ ४७ ॥
मोहनश्च सुनीथश्च शैलूषो मोहनोत्तमः ।
पर्वतो नारदश्चानी मञ्जीती पुष्पदन्तकः ।
हाहाहूहूप्रभृतयो गीतदानं प्रचक्रिरे ॥ ४८ ॥
तथा चित्ररथो नाम सर्वगन्धर्वसंवृतः ।

सर्वे ते यमलोके तु पृथिव्यां पर्यटन्ति वै ॥ ५४ ॥
गयासुरस्य शिरसि पुण्ये प्रेतादिवर्जिते ।
स्थिता ब्रह्मादयो देवा गतः सोऽपि पवित्रतां ॥ ५५ ॥
कीकटेषु गया पुण्या पुण्यं राजवनं वरं ।
च्यवनस्याश्रमः पुण्यो नदी पुण्या पुनः पुना ॥ ५६ ॥
वैकुण्ठे लोमदण्डश्च लोमकूटो गिरिस्तथा ।
श्राद्धपिण्डादिकृत्तत्र पितॄन् ब्रह्मपुरं नयेत् ॥ ५७ ॥
शिलादक्षिणपादे तु गृध्रकूटो गिरिर्मतः ।
धर्मराजेन सख्येत्यं करणाय सुपावनः ॥ ५८ ॥
गृध्ररूपेण तत्राथ तपः कृत्वा महर्षयः ।
विमुक्ता गृध्रकूटोऽयं तत्र गृध्रेश्वरः स्थितः ॥ ५९ ॥
तत्र गृध्रेश्वरं दृष्ट्वा यान्ति शम्भुपदं नराः ।
तत्र गृध्रवटं नत्वा प्राप्तकामो दिवं व्रजेत् ॥ ६० ॥
तत्र गृध्रगुहायाश्च पिण्डदः शिवलोकभाक् ।
तत्र माहेश्वरी धारा पिण्डदः स्वर्नयेत्पितॄन् ॥ ६१ ॥
मूलक्षेत्रं सरस्तत्र पिण्डदो ब्रह्मलोकभाक् ।

(१) गायति इति पाठः साधुः ।

गायन्ति[१] मधुराण्येव गीतान्यद्रौ महोत्सवं ॥४९॥
अतः स पर्वतो देवैः सेव्यतेऽद्यापि नित्यशः।
धर्मज्ञास्तत्र देवेशो हरो भस्माङ्गरागवान् ॥५०॥
पार्वत्या सहितो रुद्रः पर्वते गीतनादिते।
मोदते पूजितो ध्येयः पितृणां परमाङ्गतिं ॥५१॥
गायायां परमात्मा हि गोपतिर्वा गदाधरः।
हीयते वैष्णवी माया तथा रुद्रार्चया मुने ॥५२॥
शिलाया दक्षिणे हस्ते भस्मकूटो गिरिर्घनः।
धर्मराजेन तत्रास्ते अगस्त्यः सह भार्य्यया ॥५३॥
अगस्त्यस्य पदे स्नातः पिण्डदो ब्रह्मलोकगः।
ब्रह्मणस्तु वरं लेभे माहात्म्यं भुवि दुर्लभं ॥५४॥
लोपामुद्रां तथा भार्य्यां पितृणां परमां गतिं।
तत्रागस्त्येश्वरं दृष्ट्वा मुच्यते ब्रह्महत्यया ॥५५॥
अगस्त्यञ्च सभार्य्यञ्च पितॄन् ब्रह्मपुरं नयेत्।

भ्रूणमोक्षं पापमोक्षं शिवं दृष्ट्वा शिवं व्रजेत्॥ ६२॥
आदिपालेन गिरिणा समाक्रान्तं शिलोदरं।
यत्रास्ते गजरूपेण विघ्नेशो विघ्ननाशनः।
नाभौ च पिण्डदो यस्तु पितॄन् ब्रह्मपुरं नयेत्॥ ६३॥
नितम्बे मुण्डपृष्ठस्य देवदारुवनं त्वभूत्।
मुण्डपृष्ठेऽरविन्दाद्रिं दृष्ट्वा पापं विनाशयेत्॥ ६४॥
क्रौञ्चरूपेण संविष्टो मुनिस्तत्र तपोऽकरोत्।
तस्य पादाङ्किता यस्मात् क्रौञ्चपादः प्रकीर्त्तितः॥ ६५॥

(१) गायति इति पाठः सुसङ्गतः।

दक्षिणाख्य तपस्तेपे सीताद्रेर्दक्षिणे गिरौ ॥५६॥
वटो वटेश्वरस्तत्र स्थितश्च प्रपितामहः ।
तदग्रे रुक्मिणीकुण्डं पश्चिमे कपिला नदी ।
कपिलेशो नदीतीरे ह्यमासोमसमागमे ॥५७॥
कपिलायां नरः स्नात्वा कपिलेशं समर्च्य च ।
कृते श्राद्धे पिण्डदाने पितरो मोक्षमाप्नुयुः ॥५८॥
तत्राग्निधारा गिरिवरादागतोद्यन्तकादतु ।
तत्र सारस्वतं कुण्डं सरस्वत्या प्रकल्पितं ॥५६॥
शुक्रस्तत्र मुनिः श्राद्धं सण्डामार्कादिभिः प्रभुः ।
तत्र तत्र मुनीन्द्राणां पदेषु मुनिसत्तम ।
श्राद्धपिण्डादिकृत् स्नातः पितॄंस्तारयते नरः ॥६०॥
शिवया वामहस्तेऽपि गृध्रकूटो गिरिर्धृतः ।
गृध्ररूपेण संसिद्धास्तपस्तप्त्वा महर्षयः ॥६१॥
अतो गिरिर्गृध्रकूटस्तत्र गृध्रेश्वरः स्थितः ।
दृष्ट्वा गृध्रेश्वरं नत्वा यायात् शम्भोः पदं नरः ॥६२॥
तत्र गृध्रे गुहायाञ्च पिण्डदः शिवलोकभाक् ।
तत्र गृध्रे वटं नत्वा प्राप्तकामो दिवं व्रजेत् ॥६३॥
ऋणमोचं पापमोचं शिवं दृष्ट्वा शिवं व्रजेत् ।
शूलक्षेत्रञ्च तत्रास्ते पिण्डदः स्वर्नयेत् पितॄन् ॥६४॥

स्नातो ऽग्न्याग्रये तत्र नयेत् स्वर्गं कुलत्रयं ।
शिलायां व्याघ्ररूपेणाव्यक्तव्यक्तात्मना स्थितः ।
यष्टीशो विबुधैः सार्द्धं तस्माद्देवमयी शिला ॥ ९६ ॥

आदिपालेन गिरिणा समाक्रान्तं शिलोदरं।
तत्रास्ते गजरूपेण विघ्नेशो विघ्ननाशनः।
तं दृष्ट्वा मुच्यते विघ्नैः पितॄन् ब्रह्मपुरं नयेत् ॥६५॥
नितम्बे मुण्डपृष्ठस्य देवदारुवनन्त्वभूत्।
मुण्डपृष्ठारविन्दाद्री दृष्ट्वा पापं विनाशयेत्।
गयानाभौ सुषुम्नायां पिण्डदः स्वर्नयेत् पितॄन् ॥६६॥
शिलाया वामपादे तु स्थापितः प्रेतपर्वतः।
धर्मराजेन पापेभ्यो गिरिः प्रेतशिलाह्वयः ॥६७॥
पादेन दूरे निक्षिप्तः शिलायाः पादभारतः।
गतः शिलायाः संसर्गात् प्रेतकूटः पवित्रतां ॥६८॥
प्रेतकुण्डञ्च तत्रास्ते देवास्तत्र पदे स्थिताः(१)।
तत्र कुण्डादिकं कृत्वा(२) प्रेतत्वान्मोचयेत् पितॄन् ॥६९॥
पृथक्स्थिताश्च बहवो विघ्नकारिण एव ते।
श्राद्धादिकारिणां नॄणां तीर्थे पितृविमुक्तये।
प्रेता धानुष्करूपेण करग्रहणकारकाः ॥७०॥
पादाङ्कितां मुण्डपृष्ठां महादेवनिवासिनीं।
तां दृष्ट्वा सर्वलोकश्च मुक्तः पापोपपातकैः ॥७१॥
गयाशिरसि पुण्ये च सर्वपापैर्विवर्जिते(३)।

---

(१) पदैः स्थिता इति पाठः सुसङ्गतः।
(२) पिण्डादिकं दत्त्वा इति पाठः समीचीनः।
(३) इतः परं श्लोकार्धं पतितमित्युपलभ्यते साकाङ्क्षत्वात्।

प्रेतादिवर्जितं यस्मात् ततोऽतिपावनं वरं ॥७२॥
कीकटेषु गया पुण्या पुण्यं राजगृहं वनं ।
च्यवनस्याश्रमं पुण्यं नदी पुण्या पुनः पुना[१] ॥७३॥
वैकुण्ठो लोहदण्डश्च गृध्रकूटश्च शोणकः ।
अत्र श्राद्धादिना सर्वान् पितॄन् ब्रह्मपुरं नयेत् ॥७४॥
क्रौञ्चरूपेण हि मुनिर्मुण्डपृष्ठे तपोऽकरोत् ।
तस्य पादाङ्कितो यस्मात् क्रौञ्चपादस्ततः स्मृतः ॥७५॥
स्नातो जलाशये तत्र नयेत् स्वर्गं स्वकङ्कुलं ।
बलिः काकशिलायाञ्च काकेभ्य ऋणमोक्षदः ॥७६॥
मुण्डपृष्ठस्य नामौ हि लोमशो लोमहर्षणः ।
द्वावेतौ परमं तत्र तपःसिद्धिं पराङ्गतौ ॥७७॥
आहृतास्तु सरिच्छ्रेष्ठा लोमशेन महानदी ।
सारावती वेत्रवती चन्द्रभागा सरस्वती ॥७८॥
कावेरी सिन्धुगौराच चन्द्रना[२] च सरिद्वरा ।
वाशिष्ठी सरयूर्गङ्गा यमुना गण्डकीन्दिरा ॥८९॥
महावैतरणी नाम्ना निर्जरा च दिवोकसः ।
सावर्ण्यलकनन्दा च उदीची कनकाह्वया ॥८०॥
कौशिकी ब्रह्मदा ज्येष्ठा सर्वस्याघविमोचिनी ।
कृष्णावल्या चर्मण्वती द्वे नद्यौ मुक्तिदायिके ॥८२॥

---

(१) पुनः पुनः इति ख० ।
(२) चन्दना इति पाठोऽत्र सम्भाव्यते ।

आह्नते सरितां श्रेष्ठे लोमहर्षेण साश्मात् ।
तपसस्तु प्रभावेण नर्म्मदा मुनिपुङ्गव ।
तासु सर्वासु यः स्नात्वा पिण्डदः स्वर्णयेत् पितॄन् ॥८२॥
ब्रह्मयोनिं प्रविश्याथ निर्गच्छेद्यस्तु मानवः ।
परं ब्रह्म स यातीह विमुक्तो योनिसङ्कटात् ॥८३॥
निश्चरायां पुष्करिण्यां स्नातः श्राद्धादिकं नरः ।
कुर्य्यात् क्रौञ्चपदे दिव्ये नियमाद्दामरचयं ।
सर्वान् पितॄन्नयेत् स्वर्गं पञ्चपापिन एव च ॥८४॥
जनार्द्दनो भस्मकूटे तस्य हस्ते तु पिण्डदः ।
आत्मनोऽप्यथवान्येषां सव्येनापि तिलैर्विना ।
जीवतां दधिसंमिश्रं सर्वे ते विष्णुलोकगाः ॥८५॥
यस्तु पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ।
यदुद्दिश्य त्वया देयस्तस्मिन् पिण्डो स्तृते प्रभो ॥८६॥
एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ।
अन्तकाले गते मह्यं त्वया देयो गयाशिरे ॥८७॥
जनार्द्दन नमस्तुभ्यं नमस्ते पितृमोक्षद ॥
पितृपते नमस्ते तु नमस्ते पितृरूपिणे ॥८८॥
गयायां पितृरूपेण स्वयमेव जनार्द्दनः ।
तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ॥८९॥
नमस्ते पुण्डरीकाक्ष ऋणत्रयविमोचक ।
लक्ष्मीकान्त नमस्ते तु पितॄणां मोक्षदो भव ॥९०॥
वामजानु सुसंपाद्य गत्वा भीमो जनार्द्दनं ।

श्राद्धं सपिण्डकं कृत्वा भ्रातृभिर्ब्रह्मलोकभाक् ।
पितृभिः सह धर्मात्मा कुलानाञ्च शतेन च ॥८१॥
शिलायां व्यक्तरूपेण व्यक्ताव्यक्तात्मना स्थितः ।
सर्व्वैर्नो विबुधैः साद्धं तस्माद्देवमयी शिला ॥८२॥

इति श्रीमहापुराणे वायुप्रोक्ते[१] गयामाहात्म्यं नाम
षट्चत्वारिंशोऽध्यायः ।

---

(१) श्वेतवराहकल्पे इति मुद्रित पु० ।

अथ सप्तचत्वारिंशोऽध्यायः।

गयामाहात्म्यम्।

नारद उवाच। कथं व्यक्तस्वरूपेण स्थितश्चादिगदाधरः[१]।
कथं व्यक्तस्वरूपेण[२] व्यक्ताव्यक्तात्मना स्थितः ॥१॥
कथं गदा समुत्पन्ना यया चादिगदाधरः[३]।
गदालोलं कथञ्चासीत् सर्व्वपापक्षयङ्करं ॥२॥
सनत्कुमार उवाच। गदानामासुरो[४] आसीदत्याद्भुततरो दृढः[५]।
प्रार्थितो ब्रह्मणे प्रादात् स्वशरीरास्थि दुस्त्यजं[६] ॥३॥
ब्रह्मोक्तो विश्वकर्म्मापि गदाञ्चक्रेऽद्भुतां तदा[७]।

---

(१) स्थितो ह्यादिगदाधरः इति मुद्रित पु०।

(२) कथमव्यक्तरूपेणेति मुद्रितपु०।

(३) यस्मादादिगदाधर इति मुद्रितपु०।

(४) गदो नामासुरो इति मुद्रितपु०।

(५) गदो नामासुरो ह्यासीदित्यस्माच्छ्लोकार्धात्परतः मुद्रितपुस्तके, तपसा दारुणेनासौ ब्रह्मलब्धवरः पुरा ॥२॥ इति श्लोकार्धं वर्त्तते।

(६) ब्रह्मणा प्रार्थितः प्रादात् स्वान्यस्थीनि शरीरतः। इति मुद्रितपु०। यस्माच्छ्लोकार्धात्परतः मुद्रितपुस्तके, तस्मिन् गदेन निहते तस्यास्थीनि दृढानि वै ॥४॥ इति श्लोकार्द्धं दृश्यते।

(७) सुदारुणमिति मुद्रितपु०।

तदस्मिं वज्रनिष्पेषैः कुन्दैः स्वर्गे ह्यधारयत् ॥४॥
अथ कालेन महता मनौ स्वायम्भुवे क्वचित्[1] ।
हेती रक्षो ब्रह्मपुत्रः[2] तपस्तेपे सुदारुणं ॥५॥
दिव्यवर्षसहस्राणां शतं वायुमभक्षयत् ।
उन्मुखश्चोर्द्धबाहुश्च पादाङ्गुष्ठभरेण च ॥६॥
एकेनातिष्ठदव्यग्रः शीर्णपर्णानिलाशनः[3] ।
ब्रह्मादींस्तपसा तुष्टान् वरं वव्रे वरप्रदान् ॥७॥
देवैर्दैत्यैश्च शस्त्रास्त्रै[4] र्विविधैर्मनुजादिभिः[5] ।
कृष्णेशानादिचक्राद्यैरबध्यः स्यां महाबलः ॥८॥
तथेत्युक्तास्त्वन्तर्हितास्ते हेतिर्देवानथाजयत्[6] ।
इन्द्रत्वमकरोद्धेतिर्भीता ब्रह्महरादयः[7] ॥९॥
हरिन्ते शरणं जग्मुश्चक्रुर्हेतिं जहीति तान् ।
ऊचे हरिरबध्योऽयं हेतिर्देवासुरैः सुराः ॥१०॥

---

(१) तदस्मिं वज्रनिष्पेषैरित्यादि मनौ स्वायम्भुवे क्वचिदित्यन्तपाठो मुद्रितपुस्तके न दृश्यते ।

(२) महात्मन इति मुद्रितपु० ।

(३) दिव्यवर्षसहस्राणामित्यादि शीर्णपर्णानिलाशनः इत्यन्तपाठो मुद्रितपुस्तके नेक्ष्यते।

(४) शस्त्रैश्च इति मुद्रितपु० ।

(५) मनुजैरपि इति मुद्रितपु० ।

(६) देवांस्तदाजयदिति मुद्रितपु० ।

(७) ब्रह्मादयः सुराः इति मुद्रितपु० ।

महास्त्रं मे प्रयच्छध्वं[1] हेतिं हन्मि[2] हि येन तं।
इत्युक्तास्ते ततो देवा गदां तां हरये ददुः ॥११॥
दधार तां गदामादौ देवैरुक्तो गदाधरः।
गदया हेतिमाहत्य देवैः स त्रिदिवं ययौ[3] ॥१२॥
गदामादाववष्टभ्य गयासुरशिरःशिलां[4]।
निश्चलार्थं स्थितो यस्मात्तस्मादादिगदाधरः[5] ॥१३॥
शिलापर्वतरूपेण व्यक्त आदिगदाधरः।
शिलासौ मुण्डपृष्ठाद्रिः प्रभासो नाम पर्व्वतः ॥१४॥
उद्यन्तो गीतनादश्च भस्मकूटो गिरिर्महान्।
गृध्रकूटः प्रेतकूटश्चादिपालोऽरविन्दकः ॥१५॥
पद्मलोकः सप्तलोको वैकुण्ठो लोहदण्डकः[6]।
क्रौञ्चपादोऽक्षयवटः फल्गुतीर्थं मधुस्रवा ॥१६॥
दधिकुल्या मधुकुल्या देविका च महानदी[7]।

---

(१) प्रयच्छन्तु इति मुद्रितपु०।

(२) हन्यां इति मुद्रितपु०।

(३) देवेभ्यस्त्रिदिवं ददौ इति ख० ग०।

(४) गदामादाववष्टभ्य इति श्लोकार्धं मुद्रितपुस्तके नेष्यते तत्र अस्मिन् स्थले, धारणार्थं गदा यत्र विष्णुना लोलिताभवत्। बभूव तद्गदालोलं तीर्थं परमपावनं ॥१६॥ गदया हेतिमाहत्य गयासुरशरीरके। इति पाठो विद्यते॥

(५) ततो ह्यादिगदाधरः इति मुद्रितपु०।

(६) एतच्छ्लोकार्धं मुद्रितपुस्तके नास्ति।

(७) दधिकुल्या मधुकुल्या एतच्छ्लोकार्धं मुद्रितपुस्तके नास्ति तत्र तस्मिन्

वैतरण्यादिरूपेण व्यक्त आदिगदाधरः[1] ॥१७॥
विष्णोः पदं रुद्रपदं ब्रह्मणः पदमुत्तमं ।
काश्यपस्य पदं दिव्यं द्वौ हस्तौ यत्र निर्गतौ ॥१८॥
पञ्चाग्नीनां पदान्यत्र इन्द्रागस्त्यपदे परे ।
रवेश्च कार्त्तिकेयस्य क्रौञ्चमातङ्गयोरपि ॥१९॥
मुख्यलिङ्गानि सर्व्वाणि व्यक्ताव्यक्तात्मना स्थितः ।
आद्यो[2]गदाधरश्चैव व्यक्तः श्रीमान् गदाधरः ॥२०॥
गायत्री चैव सावित्री सन्ध्या चैव सरस्वती ।
गयादित्यश्चोत्तरार्को दक्षिणार्कोऽपि नैमिषः ॥२१॥
श्वेतार्को गणनाथश्च वसवोऽष्टौ मुनीश्वराः ।
रुद्राश्चैकादशैवाथ तथा सप्तर्षयोऽपरे[3] ॥२२॥
सोमनाथश्च[4] सिद्धेशः कपर्द्दीशो विनायकः ।
नारायणो महालक्ष्मीर्ब्रह्मा श्रीपुरुषोत्तमः ॥२३॥

स्थले, महानदी ब्रह्मसर उदीची कनकाख्या ॥ १५ ॥ नदी देवनदी चाग्नी सुषुम्ना निश्चला नदी । इति श्लोकार्धद्वयमस्ति ।

(१) वैतरण्यादिनाव्यक्तरूपेणादिगदाधरः इति ख० ग० ।

(२) आदाविति मुद्रितपु० ।

(३) गायत्री चैव सावित्री इत्यादि तथा सप्तर्षयोऽपरे इत्यन्तपाठो मुद्रितपुस्तके नेक्ष्यते तत्र कस्मिन् स्थले पाठान्तरं दृश्यते तद्यथा—

उत्तरार्को दक्षिणार्कः श्वेतार्को गणनायकः ।
नरसिंहो वामनश्च केदारकनकेश्वरौ ।२०।
षण्मुखीशः षण्मुखयशीशो मुखपृष्ठेऽथ चण्डिका ।

(४) लोकनाथश्चेति मुद्रितपु० ।

मार्कण्डेयेशः कोटीशो ह्यङ्गिरेशः पितामहः ।
जनार्दनो[१] मङ्गला च पुण्डरीकाक्ष उत्तमः ॥२४॥
इत्यादिव्यक्तरूपेण स्थितश्चादिगदाधरः ।
हेतिर्या राक्षसस्मिन् हते विष्णुः पुरं गतः[२] ॥२५॥
ब्रह्मणा सह रुद्राद्यैः कारिते निश्चलेऽसुरे ।
तुष्टावाद्यगदापाणिं वेधा हर्षेण निर्वृतः[३] ॥२६॥

ब्रह्मोवाच। गदाधरं व्यपगतकालकल्मषं[४]
गयागतं विदितगुणं गुणातिगं ।
गुहायतं गिरिवरगौरगेहगं[५]
गणार्चितं[६] वरदमहं नमामि[७] ॥२७॥
महःश्रियं[८] चिदग्रगणादिसुश्रियं
भवश्रियं[९] दितिभवदारणश्रियं ।

(१) जनार्दनो मङ्गला च एतच्छ्लोकार्धात्प्राक् मुद्रितपुस्तके,
रुद्रेशश्चैव सोमेशो रामेशः प्रपितामहः ॥२२॥
इति श्लोकार्धं वर्त्तते ।
(२) स्थितः पुरा इति मुद्रितपु० ।
(३) तुष्टावाथ जगद्धाता प्रभातोऽपि गदाधरं ॥२४॥ इति मुद्रितपु० ।
(४) कलिगतकल्मषापहमिति मुद्रितपु० ।
(५) गिरिवरगेहगोपितमिति मुद्रितपु० ।
(६) सुरार्चितमिति मुद्रितपु० ।
(७) वरद नमामि तं इति ख० ग० ।
(८) शुभश्रियमिति मुद्रितपु० ।
(९) यज्ञःश्रियं इति मुद्रितपु० ।

कलिश्रियं(१) कलिमलमर्दनश्रियं
गदाधरं नौमि तमाश्रितश्रियं(२) ॥२८॥
दृढाद्दृढं परिदृढगाढसंस्तुतं
कामाद्धुतं सुदृढमर्कढिरूढिगं ।
तमाद्यगं दृढदुरिताद्यढौकितं
स्वढौकृतं दृढतरगोपसन्निभं(३) ॥२९॥
विदेहकं करणकलाविवर्जितं
विजन्मकं दिनकरवेदिभाषितं(४) ।
गदाधरं ध्वनिसुखवर्जितं परं
नमाम्यहं सततमनादिमीश्वरं हरिं(५) ॥३०॥
मनोऽतिगं(६) मतिगतिवर्जितं परं(७)
सदाद्वयं श्रुतिशिरसि संस्तुतं बुधैः(८) ।
चिदात्मकं कलिगतकारणातिगं
गदाधरं हृदयगतं नमामि तं(९) ॥३१॥

---

(१) कलागतं इति मुद्रितपु० ।

(२) गदाधरं नौमि तमाश्रितश्रियमेतत्परार्द्धं मुद्रितपुस्तके नेक्ष्यते तत्र तत्स्थाने, दृढाद्दृढं परिदृढगाढशक्तिभिरितिपाठो वर्त्तते।

(३) एष श्लोको मुद्रितपुस्तके न दृश्यते।

(४) वियन्मयञ्चिमहरवारिभूषितमिति मुद्रितपु० ।

(५) परममनादिदेवकमिति मुद्रितपु० ।

(६) मनोगतमिति मुद्रितपु० ।

(७) त्वजमिति मुद्रितपु० ।

(८) प्रमात्मकं श्रुतिशिरसि स्थितं बुधमिति मुद्रितपु० ।

(९) नमाम्यहमिति मुद्रितपु० ।

सनत्कुमार उवाच । देवैः सार्द्धं ब्रह्मणैवं स्तुतश्चादिगदाधरः ।
उक्ते वरं वृणीष्व त्वं वरं ब्रह्मा तमब्रवीत् ॥२२॥
शिलायां देवरूपिण्यां न तिष्ठामस्त्वया विना ।
व्यक्ताव्यक्तोऽत्र त्वया सार्द्धं नित्यं व्यक्तादिरूपिणा[१] ॥२३॥
एवमस्तु श्रिया सार्द्धं स्थितश्चादिगदाधरः[२] ।
लोकानां रक्षणार्थाय जगतां मुक्तिहेतवे ।
सुव्यक्तः पुण्डरीकाक्षो जनार्दन इति श्रुतः[३] ॥२४॥
वेदैरगम्या[४] यामूर्त्तिरादिभूता सनातनी ।
सुव्यक्ता श्वेतकल्पे सा भविष्यति[५] तथा पुनः ।
वाराहकल्पे ह्यव्यक्ता व्यक्तिमप्यगमत् पुरा[६] ॥२५॥
सन्तारणाय लोकानां देवानां रक्षणाय च ।
गयाशिरसि सुव्यक्तो भविष्यति[७] न संशयः ॥२६॥

---

(१) शिलायां देवरूपिण्यां स्थिरं तिष्ठ सुरेश्वर ।
व्यक्तो गदाधरो भूत्वाव्यक्तश्चैव जनार्दन ॥२१॥ इति मुद्रितपु० ।
(२) एतच्छ्लोकार्धं मुद्रितपुस्तके न विद्यते ।
(३) एष श्लोको मुद्रितपुस्तके नास्ति तत्र तस्मिन् स्थले पाठान्तरमस्ति तद्यथा,—
लोकानां रक्षणार्थाय तमुवाच गदाधरः ।
शिलायां देवरूपिण्यां स्थित्वा यूयं तु तिष्ठत ॥२२॥
सुव्यक्तः पुण्डरीकाक्षः श्वेतकल्पे तथा स्थितः ।
(४) देवैर्गम्या चेति मुद्रितपु० ।
(५) व्यक्तः श्वेतकल्पे तु भविष्यामीति मुद्रितपु० ।
(६) वराहकल्पे सुव्यक्तो देव आदिगदाधरः ॥२३॥ इति मुद्रितपु० ।
(७) भविष्यामीति मुद्रितपु० ।

ये द्रक्ष्यन्ति सदा भक्त्या देवमादिगदाधरं ।
कुष्ठरोगादिनिर्मुक्ता यास्यन्ति हरिमन्दिरं(१) ॥३७॥
ये द्रक्ष्यन्ति सदा भक्त्या देवमादिगदाधरं ।
ते प्राप्स्यन्ति धनं धान्यमायुरारोग्यमेव च ॥३८॥
कलत्रपुत्रपौत्रादिगुणकीर्त्तिसुखानि च(२) ।
श्रद्धया ये नमस्यन्ति राज्यं ब्रह्मपुरं तथा(३) ।
भुक्त्वा व्रजेयुः सततं पुण्यपुञ्जफलं नराः(४) ॥३९॥
गन्धदानेन गन्धाढ्याः(५) सौभाग्यं पुष्पदानतः ।
धूपदानेन राज्याप्तिर्दीपाद्दीप्तिर्भविष्यति(६) ॥४०॥
ध्वजदानात् पापहानिर्याचात्तद्ब्रह्मलोकभाक् ।
श्राद्धपिण्डप्रदो यस्तु(७) विष्णुं नेष्यति वै पितॄन् ॥४१॥
श्रद्धया ये नमस्यन्ति(८) स्तोत्रेणादिगदाधरं ।
स्तोष्यन्ति च समभ्यर्च्य पितॄंस्तेष्यन्ति माधवं(९) ।
शिवोऽपि परया प्रीत्या तुष्टावादिगदाधरं ॥४२॥

---

(१) इमौ श्लोकौ मुद्रितपुस्तके नावलोक्यते ।
(२) सुखादिकमिति मुद्रितपु० ।
(३) राज्यं विष्णुपुरे भवेत् इति मुद्रितपु० ।
(४) भुक्त्वा व्रजेयुः सततमित्यादि चरणद्वयं मुद्रितपुस्तके न विद्यते ।
(५) गन्धाप्तिरिति मुद्रितपु० ।
(६) दीप्तिं प्रयच्छति इति ख० ग० ।
(७) श्राद्धपिण्डादिदानेन इति मुद्रितपु० ।
(८) श्रद्धयानेन ये देवं इति मुद्रितपु० ।
(९) मां हरिमिति मुद्रितपु० ।

शिव उवाच । अव्यक्तरूपो यो देवो मुण्डपृष्ठाद्रिरूपतः[1] ।
फल्गुतीर्थादिरूपेण नमाम्यादिगदाधरं[2] ॥४२॥
व्यक्ताव्यक्तस्वरूपेण पदरूपेण संस्थितः ।
मुखलिङ्गादिरूपेण नमाम्यादिगदाधरं[3] ॥४४॥
अव्यक्तरूपो[4] यो देवो जनार्दनस्वरूपतः ।
मुण्डपृष्ठे स्वयं जातो[5] नमाम्यादिगदाधरं[6] ॥४५॥
शिलायां देवरूपिण्यां स्थितं ब्रह्मादिभिः सुरैः ।
पूजितं सततं देवेशं नमामि गदाधरं[7] ॥४६॥
यंश्च दृष्ट्वा ततः[8] स्पृष्ट्वा पूजयित्वा प्रणम्य च ।
आह्लादौ ब्रह्मलोकाप्तिर्नमाम्यादिगदाधरं[9] ॥४७॥
महदादेश्च[10] जगतो व्यक्तस्यैकं हि कारणं ।
अव्यक्तज्ञानरूपं तं नमाम्यादिगदाधरं ॥४८॥
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितं ।

---

(१) मुण्डपृष्ठाद्रिरूपधृक् इति मुद्रितपु० ।
(२) तं नमामि गदाधरमिति मुद्रितपु० ।
(३) एष श्लोको मुद्रितपुस्तके न विद्यते ।
(४) व्यक्तरूपो हीति मुद्रितपु० ।
(५) स्थितोति मुद्रितपु० ।
(६) तं नमामि गदाधरमिति मुद्रितपु० ।
(७) पूजितं वा स्तुतं देवं नमाम्यादिगदाधरमिति ख० ग० ।
(८) तथा इति मुद्रितपु० ।
(९) तं नमामि गदाधरमिति मुद्रितपु० ।
(१०) महादेवस्य इति मुद्रितपु० ।